॥ श्रीः ॥

# दुर्गा सप्तशती पारायण क्रमः

Bhaskara Prakasha Ashram

**॥ श्री सद्गुरुचरणारविन्दाभ्यां नमः ॥**

**॥ श्रीः ॥**

**॥ श्री महागणपतये नमः ॥**

श्री विमर्शानन्दनाथं सत्याम्बासहितं गुरुम् ।

हृत्पद्मकर्णिका मध्ये भावयेत् सर्वसिद्धये ॥

श्री प्रकाशानन्दनाथं विमर्शाम्बा सहितं गुरुम् ।

हृत्पद्मकर्णिका मध्ये भावयेत् सर्वसिद्धये ॥

श्री रामानन्द् नाथं रामाम्बा सहितं गुरुम् ।

हृत्पद्मकर्णिका मध्ये भावयेत् सर्वसिद्धये ॥



# श्री श्री विमर्शानन्द् नाथेन्द्र सरस्वती स्वामी

śrī śrī vimarśānanda nāthēndra sarasvatī svāmī

# About this book

This book is intended for use by members of Bhaskara Prakasha Ashram to guide the chanting of the mantras during performance of a Chandi Homam. This book does not represent the entirety of Puja and Homa Krama\s prescribed for the performance of a Chandi Homam, and we want to emphasize that there are aspects of the Homam that are performed by the Acharyas not documented in this publication.

This publication is a useful companion to the audio publication Durga Saptashati Paarayana Krama (https://bhaskaraprakasha.org/publications/audio/) of Bhaskara Prakasha Ashram. It is in the same order as the audio publication with the exception of the Sankalpam which is only in the book.

The Sankalpam in this publication is provided to enable devotees participating in the Devi Mahatmyam Parayanams and Shri Chandi Homam events being performed by Bhaskara Prakasha Ashram.

We have put in our best efforts to ensure that this publication is error free. However, if you notice any errors, typos or corrections required to this book or have suggestions, please let us know at info@bhaskaraprakasha.org.

No part of this publication should be used in an unauthorized manner without the permission and authorization from Bhaskara Prakasha Ashram.

This book is dedicated to our Guru Parampara on behalf of the disciples of Bhaskara Prakasha Ashram. We pray to Chandika Mahalakshmi to bestow blessings on all members and disciples of our Ashram.

.

*****

# Preface to the first edition

śrī gurubhyōnamaḥ



**durgā saptaśati**, also known as **dēvīmāhātmyam**, is a text from the **mārkaṇḍēya purāṇam**. Chanting the dēvīmāhātmyam is a highly potent form of dēvī worship due to the seven hundred powerful mantras contained in the verses of durgā saptaśati. These seven hundred mantras are chanted in the performance of a **caṇḍīhōmam** as oblations are offered to dēvī.

This book is a distilled version of the caṇḍīhōmam procedures documented by our guru śrī śrī vimarśānanda nāthēndra sarasvati svāmī (1902–1996). **śrī vimarśananda**, the founder of Bhaskara Prakasha Ashram, travelled to all parts of India teaching Vedas, Agamas, Tantras and śrīvidyā upāsana to many devotees. In 1996, just prior to attaining Maha Samadhi, **śrī vimarśananda** directed his grandson, śrī Raghu Y Ranganathan (**śrī svabhāvānandanātha**), and senior disciples, śmt Akhila Ranganathan (**śrī kāmēśvaryamba**), śrī Kumar Ramachandran and śmt. Gowri Ramachandran to establish Bhaskrara Prakasha Ashram in North America and Europe.

The hallmark of Bhaskara Prakasha Ashram is the unbroken lineage of śrīvidyā Gurus and the immense faith and devotion of the sadhakas and upasakas to their Gurus and Guru Parampara. All Bhaskara Prakasha Ashram devotees follow the principles and traditional practices prescribed by the Siddhamalli Guru Parampara under the guidance of current Gurus of the ashram. **śrī vimarśananda**'s dedication to the performance of rituals with utmost devotion, sincerity and his commitment to excellence is manifested in every endeavor of the Ashram and its members, whether it is a daily Puja, a caṇḍīhōmam or a grand kumbhābhiṣēkam (temple consecration).

Today, Bhaskara Prakasha Ashram conducts numerous spiritual activities due to the dedicated efforts of its volunteers who donate their time and monetary resources for the conduct of various Ashram activities. We pray to the supreme goddess Maha Tripura Sundari to shower her blessings on all of Bhaskara Prakasha Ashram's disciples and volunteers who work for the well being of the entire world.

All of our publications are possible due to the guidance provided by **śrī jñānānanda tīrtha svāmī**, the current pīṭhādhipati of Bhaskara Prakasha Ashram, and śrī R. Ramakrishnan Dikshitar (**śrī pūrṇānandanātha**), who leads the Publications and Research aspects of the ashram. On behalf of all of the members of the Ashram, I would like to express my sincere gratitude to śrī R. Ramakrishnan Dikshithar, śrī Shankara Narayanan, śmt Latha Ramani Sundaresan, Dr Mythili Seetharaman and Sivasakthi Subramanian from India, and śrī Raghu Y Ranganathan, śmt Akhila Ranganathan, śrī Kumar Ramachandran, śrī Addepalli Suryanarayana, śmt Addepalli Sarada, śrī Sriram Srinivasan and many others in North America. This publication would not have been possible without their tireless efforts in typesetting and editing this publication.

Bhaskara Prakasha Ashram thanks the yeomen service rendered by late Smt. Janaki Ramachandran and late Shri T.A. Ramachandran, parents of Shri Kumar Ramachandran, who played a vital role in inspiring many disciples of BPA through their knowledge, drive, hard work, and undying faith. They created multiple works that made it much easier for everyone to follow the teachings of our Shri Vidya Guru parampara.



Dedicated to the holy feet of our Guru Parampara.

K.R.Yegnarathnam December 2018

Global Head, Bhaskara Prakasha Ashram Chennai, India

# श्री श्री ज्ञानानन्द तीर्थ स्वामी

# śrī śrī jñānānanda tīrtha svāmī




**śrī śrī jñānānanda tīrtha svāmī** is the illustrious second son and also a very competent disciple of rare talent of our guru maharaj śrī śrī vimarśānanda nāthēndra sarasvati svāmījī. To put it in a nutshell, he is a practicing śrī vidyōpāsaka par excellence and no field or practices in the Great Ocean of śrī Vidya worship is untouched or unvisited by him.

He took Sanyasa Ashram on 1st January, 2017 on the banks of river **tāmraparṇi** in Siddha Malli Village, Tamil Nadu. Siddha Malli is the birthplace of our Moola Guru **śrī kāmēśvarānanda tīrtha**, wherein he built the famous Lalithambika Mutt and installed śrī Lalithambika Vigraha in the Mutt temple.

**śrī jñānānanda tīrtha svāmī** has been instrumental in leading the ritual practices of various Pujas and Temple kumbhābhiṣēkams conducted by Bhaskara Prakasha Ashram.

# śrī R. Ramakrishnan   śmt Lalitha Ramakrishnan



śrī Ramakrishnan (**śrī pūrṇānandanātha**) and his wife śmt. Lalitha Ramakrishnan (**śrī lōpāmudra**) are respected śrīvidyā upāsakas. Practicing śrīvidyā upāsana for the past 60 years, they are praised and venerated by practitioners of śrīvidyā Tantra for their deep knowledge of Tantrik and Agamic scriptures. śrī Ramakrishnan has incredible memory to recollect the different ideas provided in different Tantrik texts. He has done extensive research on śrīvidyā Tantra, especially from manuscripts relating to śrīvidyā Tantra preserved at the Adyar Library, Theosophical Society of India.

śrī Ramakrishnan is the Poorva-ashrama son of śrī śrī vimarśānanda nāthēndra sarasvati svāmī. Currently living in Madurai, India, śrī Ramakrishnan is leading the publication division of Bhaskara Prakasha Ashram by providing expert knowledge and advice about using the Tantra texts for Pujas and Homas.

Bhaskara Prakasha Ashram is extremely grateful to śrī Ramakrishnan and śmt Lalitha Ramakrishnan for their generous help in bringing out Upasana Krama texts and their continuing guidance to Ashram's spiritual activities.

# śrī Raghu Y Ranganathan and śmt Akhila Ranganathan



śrī Raghu Y Ranganathan (**śrī svabhāvānandanātha**) and śmt Akhila Ranganathan (**śrī kāmēśvaryamba**) are senior disciples of His Holiness śrī śrī vimarśānanda nāthēndra sarasvati svāmījī, the founder of Bhaskara Prakasha Ashram. Raghu is also his poorva-ashrama grandson and son of śrī K.R.Yegnarathnam.

Raghu has been leading the Bhaskara Prakasha Ashram (BPA) activities outside India and is the President of BPA in North America. Raghu started his training in vedas in gurukul style under his guru and grandfather at the age of seven. He was initiated into śrīvidyā upāsana and accompanied his Guru in performing more than 500 caṇḍīhōmams , śrīvidyā hōmams and śrīvidyā navāvaraṇa pūjās. Raghu's first independent śata caṇḍīhōmam was performed at śrī Kamakshi temple in New Delhi in 1988 at the age of 23. Raghu and Akhila have initiated and taught dēvīmāhātmyam, traditional Vedic chanting and śrīvidyā Tantra worship to many devotees in Kenya, Singapore, UAE, USA and Canada since 1996. They have travelled widely in the USA and Canada performing various Pujas and Homas including śata caṇḍīhōmams, śahasra caṇḍīhōmams, atirudram and śrīvidyā navāvaraṇa hōmams. In addition to their passion for teaching Vedas, Agamas and Tantras to sincere devotees, Raghu and Akhila, striving for continuous improvements, are continuing to learn the ocean of knowledge available in our scriptures. They prefer to be called Shishyas because they are mentored, taught and provided insights into the performance of Pujas and Homas by śrī jñānānanda nātha svāmījī, śri K.R.Yegnarathnam, and śri. Ramakrishnan.

# विषयसूचिक


| | | | | | |
|---|---|---|---|---|---|
| गणपति ध्यानम् | 1 | द्वितीयोऽध्यायः | 73 | प्राधानिक रहस्यम् | 167 |
| गुरुप्रार्थन | 3 | तृतीयोऽध्यायः | 83 | वैकृतिक रहस्यम् | 172 |
| गणपत्यथर्वशीर्षोपनिषत् | 5 | चतुर्थोऽध्यायः | 89 | मूर्ति रहस्यम् | 177 |
| देव्यथर्वशीर्षोपनिषत् | 10 | पञ्चमोऽध्यायः | 99 | कर्पूरनीराजनम् | 181 |
| सङ्कल्पम् | 18 | षष्ठोऽध्यायः | 110 | मन्त्रपुष्पम् | 182 |
| मातृका न्यासम् | 20 | सप्तमोऽध्यायः | 114 | क्षमा प्रार्थन | 188 |
| सिद्धकुञ्जिका स्तोत्रम् | 30 | अष्टमोऽध्यायः | 118 | मङ्गलम् | 190 |
| देवी कवचम् | 33 | नवमोऽध्यायः | 127 | महिषासुरमर्दिनीस्तोत्रम् | 193 |
| अर्गला स्तोत्रम् | 41 | दशमोऽध्यायः | 133 | आश्चर्यस्तोत्रम् | 198 |
| कीलक स्तोत्रम् | 45 | एकादशोऽध्यायः | 138 | सहस्रनामस्तोत्रम् | 204 |
| रात्रि सूक्तम् | 48 | द्वादशोऽध्यायः | 147 | त्रिशतीस्तोत्रम् | 225 |
| नवार्ण जपम् | 50 | त्रयोदशोऽध्यायः | 153 | देवीस्तुति | 233 |
| सप्त शती न्यासः | 55 | उत्तराङ्गम् | 157 | | |
| प्रथमोऽध्यायः | 59 | देवी सूक्तम् | 162 | | |


*****

©Bhaskara Prakasha Ashram

# ॥ देवी माहात्म्यम् ॥

## पूर्वाङ्गम्

## गणपति ध्यानम्

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्न वदनं ध्यायेत् सर्व विघ्नोपशांतये ॥


ॐ गणानां त्वा गणपतिगं हवामहे,
कविं कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत
आ नः शृण्वन्नूतिभिस्सीद सादनम् ॥

श्रीमहागणाधिपतये नमः

*****

# ॥ गुरु प्रार्थना ॥

## भास्करप्रकाश गुरु परम्परा



## ॥ गुरुत्रयम् ॥

ॐ

शिव-शक्ति  समारम्भाम् भास्कराचार्य मध्यमाम् ।
अस्मद् श्री नाथ पर्यन्ताम् वन्दे गुरु परम्पराम् ॥

1. ऐं ह्रीं श्रीं ऐं क्लीं सौः ।
हंस शिवस्सोऽहं स्वरूप निरूपण हेतवे श्रीगुरवे नमः ।
स्वगुरु, ........ समेत श्री ..... गुरु श्रीपादुकां पूजयामि नमः ॥

2. ऐं ह्रीं श्रीं ऐं क्लीं सौः ।
सोऽहं हंसश्शिवः स्वच्छ प्रकाश विमर्श हेतवे श्रीपरमगुरवे नमः ।
परमगुरु, ........ समेत श्री ..... परमगुरु श्रीपादुकां पूजयामि नमः ॥

3. ऐं ह्रीं श्रीं ऐं क्लीं सौः ।
हंसश्शिवः सोऽहं हंसः स्वात्मारामपंजरविलीनतेजसे श्रीपरमेष्ठिगुरवे नमः ।
परमेष्ठिगुरु, ...... समेत श्री ..... परमेष्ठिगुरु श्रीपादुकां पूजयामि नमः ॥

Notes:

1. स्वगुरु is the Guru who blessed one with मन्त्रोपदेशम्
2. परमगुरु is the Guru of one's Guru
3. परमेष्ठिगुरु is the Guru of one's Guru's Guru

**Example 1**: If your मन्त्रोपदेशम् is from **ज्ञानानन्द नाथ** then, your guru is ज्ञानाम्बा समेत श्री ज्ञानानन्द नाथ, your parama guru is सत्याम्बा समेत श्री विमर्शानन्द नाथ, and your parameshti guru is विमर्शाम्बा समेत श्री प्रकाशानन्द नाथ. Your gurutrayam and gurupūja would be:

1. ऐं ह्रीं श्रीं ऐं क्लीं सौः । हंस शिवस्सोहं स्वरूप निरूपण हेतवे श्रीगुरवे नमः ।
   स्वगुरु, **ज्ञानाम्बा** समेत श्री **ज्ञानानन्द नाथ** गुरु श्रीपादुकां पूजयामि नमः ॥
2. ऐं ह्रीं श्रीं ऐं क्लीं सौः । सोऽहं हंसश्शिवः स्वच्छ प्रकाश विमर्श हेतवे श्रीपरमगुरवे नमः ।
   परमगुरु, **सत्याम्बा** समेत श्री **विमर्शानन्द नाथ** परमगुरु श्रीपादुकां पूजयामि नमः ॥
3. ऐं ह्रीं श्रीं ऐं क्लीं सौः । हंसश्शिवः सोऽहं हंसः स्वात्मारामपंजरविलीनतेजसे श्रीपरमेष्ठिगुरवे नमः ।
   परमेष्ठिगुरु, **विमर्शाम्बा** समेत श्री **प्रकाशानन्द नाथ** परमेष्ठिगुरु श्रीपादुकां पूजयामि नमः ॥

**Example 2**: If your मन्त्रोपदेशम् is from **स्वभावानन्द नाथ** then, your guru is कामेश्वर्यम्बा समेत श्री स्वभावानन्द नाथ, your parama guru is सत्याम्बा समेत श्री विमर्शानन्द नाथ, and your parameshti guru is विमर्शाम्बा समेत श्री प्रकाशानन्द नाथ. Your gurutrayam and gurupūja would be:

1. ऐं ह्रीं श्रीं ऐं क्लीं सौः । हंस शिवस्सोहं स्वरूप निरूपण हेतवे श्रीगुरवे नमः ।
   स्वगुरु, कामेश्वर्यम्बा समेत श्री स्वभावानन्द नाथ गुरु श्रीपादुकां पूजयामि नमः ॥
2. ऐं ह्रीं श्रीं ऐं क्लीं सौः । सोऽहं हंसश्शिवः स्वच्छ प्रकाश विमर्श हेतवे श्रीपरमगुरवे नमः ।
   परमगुरु, **सत्याम्बा** समेत श्री **विमर्शानन्द नाथ** परमगुरु श्रीपादुकां पूजयामि नमः ॥
3. ऐं ह्रीं श्रीं ऐं क्लीं सौः । हंसश्शिवः सोऽहं हंसः स्वात्मारामपंजरविलीनतेजसे श्रीपरमेष्ठिगुरवे नमः ।
   परमेष्ठिगुरु, **विमर्शाम्बा** समेत श्री **प्रकाशानन्द नाथ** परमेष्ठिगुरु श्रीपादुकां पूजयामि नमः ॥

*****

# ॥ गणपत्यथर्वशीर्षोपनिषत् ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवागं सस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न
इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो
अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥
ओं शान्तिः शान्तिः शान्तिः ॥

ॐ नमस्ते गणपतये । त्वमेव प्रत्यक्षं तत्त्वमसि । त्वमेव केवलं कर्तासि ।
त्वमेव केवलं धर्तासि । त्वमेव केवलं हर्तासि । त्वमेव सर्वं खल्विदं
ब्रह्मासि । त्वं साक्षादात्मासि नित्यम् ॥1॥

ऋतं वच्मि । सत्यं वच्मि ॥2॥

अव त्वं माम् । अव वक्तारम् । अव श्रोतारम् । अव दातारम् ।
अव धातारम् । अवानूचानमव शिष्यम् ।
अव पश्चात्तात् । अव पुरस्तात् । अवोत्तरात्तात् ।
अव दक्षिणात्तात् । अव चोर्ध्वात्तात् । अवाधरात्तात् ।

सर्वतो मां पाहि पाहि समन्तात् ॥3॥

त्वं वाङ्मयस्त्वं चिन्मयः । त्वमानन्दमयस्त्वं ब्रह्ममयः ।
त्वं सच्चिदानन्दाऽद्वितीयोऽसि । त्वं प्रत्यक्षं ब्रह्मासि ।
त्वं ज्ञानमयो विज्ञानमयोऽसि ॥4॥

सर्वं जगदिदं त्वत्तो जायते । सर्वं जगदिदं त्वत्तस्तिष्ठति ।
सर्वं जगदिदं त्वयि लयमेष्यति । सर्वं जगदिदं त्वयि प्रत्येति ।
त्वं भूमिरापोऽनलोऽनिलो नभः । त्वं चत्वारि वाक्पदानि ॥5॥

त्वं गुणत्रयातीतः । त्वं अवस्थात्रयातीतः । त्वं देहत्रयातीतः ।
त्वं कालत्रयातीतः । त्वं मूलाधारस्थितोऽसि नित्यम् ।
त्वं शक्तित्रयात्मकः । त्वां योगिनो ध्यायन्ति नित्यम् ।
त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं
चन्द्रमास्त्वं ब्रह्म भूर्भुवस्सुवरोम् ॥6॥

गणादिं पूर्वमुच्चार्य वर्णादीं स्तदनन्तरम् । अनुस्वारः परतरः ।
अर्धेन्दुलसितम् । तारेण ऋद्धम् । एतत्तव मनुस्वरूपम् ।

गकारः पूर्वरूपम् । अकारो मध्यमरूपम् । अनुस्वारश्चान्त्यरूपम् ।
बिन्दुरुत्तररूपम् । नादः सन्धानम् । सग्ंहिता सन्धिः। सैषा गणेशविद्या ।
गणक ऋषिः । निचृद्गायत्री च्छन्दः । श्रीमहागणपतिर्देवता ।
ओं गं गणपतये नमः ॥7॥

एकदन्ताय विद्महे वक्रतुण्डाय धीमहि ।
तन्नो दन्तिः प्रचोदयात् ॥8॥

एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम् ।
रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम् ।
रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम् ।
रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम् ।
भक्तानुकम्पिनं देवं जगत्कारणमच्युतम् ।
आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् ।
एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥9॥

नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेऽस्तु

लम्बोदरायैकदन्ताय विघ्नविनाशिने शिवसुताय श्रीवरदमूर्तये नमः ॥10॥

एतदथर्वशीर्षं योऽधीते । स ब्रह्मभूयाय कल्पते ।

स सर्वविघ्नैर्न बाध्यते । स सर्वत्र सुखमेधते ।

स पञ्चमहापापात् प्रमुच्यते ।

सायमधीयानो दिवसकृतं पापं नाशयति ।

प्रातरधीयानो रात्रिकृतं पापं नाशयति ।

सायं प्रातः प्रयुञ्जानो पापोऽपापो भवति । सर्वत्राधीयानोऽपविघ्नो

भवति। धर्मार्थकाममोक्षं च विन्दति । इदमथर्वशीर्षमशिष्याय न देयम् ।

यो यदि मोहाद् दास्यति । स पापीयान् भवति । सहस्रावर्तनाद्यं यं

काममधीते । तं तमनेन साधयेत् ॥11॥

अनेन गणपतिमभिषिञ्चति । स वाग्मी भवति। चतुर्थ्यामनश्नन् जपति ।

स विद्यावान् भवति । इत्यथर्वणवाक्यम् ।

ब्रह्माद्याचरणं विद्यान्न बिभेति कदाचनेति ॥12॥

यो दूर्वाङ्कुरैर्यजति । स वैश्रवणोपमो भवति । यो लाजैर्यजति । स यशोवान् भवति । स मेधावान् भवति ।

यो मोदकसहस्रेण यजति । स वाञ्छितफलमवाप्नोति ।

यः साज्य समिद्भिर्यजति । स सर्वं लभते स सर्वं लभते ॥13॥

अष्टौ ब्राह्मणान् सम्यग् ग्राहयित्वा । सूर्यवर्चस्वी भवति । सूर्यग्रहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा सिद्धमन्त्रो भवति । महाविघ्नात् प्रमुच्यते । महादोषात् प्रमुच्यते ।

महापापात् प्रमुच्यते । महाप्रत्यवायात् प्रमुच्यते । स सर्वविद्भवति स सर्वविद्भवति । य एवं वेद । इत्युपनिषत् ॥14॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवागं सस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

*****

# ॥ देव्यथर्वशीर्षोपनिषत् ॥

ॐ सर्वे वै देवा देवी-मुपतस्थुः ।
कासि त्वं महादेवीति ॥1॥

साब्रवीद्-अहं ब्रह्मस्वरूपिणी ।
मत्तः प्रकृति-पुरुषात्मकं जगत् ।
शून्यं चा-शून्यं च ॥2॥

अहमानंदा-ना-नन्दौ ।
अहं विज्ञा-ना-विज्ञाने ।
अहं ब्रह्मा ब्रह्मणि वेदितव्ये ।
अहं पञ्च-भूता-न्य-पञ्च-भूतानि ।
अहमखिलं जगत् ॥3॥

वेदोऽह-म-वेदोऽहम् ।
विद्याह-म-विद्याहम् ।
अजाह-मन-जाहम् ।

अधश्–चोर्ध्वं च तिर्यक्–चा–हम् ॥4॥

अहं रुद्रेभिर्–वसुभिश्–चरामि । अहमादि–त्यै–रुत विश्वदेवैः ।
अहं मित्रा–वरुणा–वुभौ बिभर्मि । अहमिन्द्राग्नी अहमश्विना–वुभौ ॥5॥

अहं सोमं त्वष्टारं पूषणं भगं दधामि ।
अहं विष्णु–मुरु–क्रमं ब्रह्माण–मुत प्रजापतिं दधामि ॥6॥

अहं दधामि द्रविणं हविष्मते सुप्राव्ये३ यज–मानाय सुन्वते ।
अहं राष्ट्री सङ्गमनी वसूनां चिकि–तुषी प्रथमा यज्ञि–यानां ।
अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वन्तः समुद्रे ।
य एवं वेद । स दैवीं संपद–माप्नोति ॥7॥

ते देवा अब्रुवन् ।
नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥8॥

तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् ।
दुर्गां देवीगं शरणमहं प्रपद्या महेऽसुरा–न्नाशयि–त्र्यै ते नमः ॥9॥

देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति ।
सा नो मंद्रेषमूर्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैतु॥10॥

कालरात्रीं ब्रह्मस्तुतां वैष्णवीं स्कन्दमातरम् ।
सरस्वती–मदितिं दक्ष–दुहितरं नमामः पावनां शिवाम्॥11॥

महालक्ष्म्यै च विद्महे सर्वशक्त्यै च धीमहि ।
तन्नो देवी प्रचोदयात् ॥12॥

अदितिर्–ह्य–जनिष्ट दक्ष या दुहिता तव ।
तां देवा अन्व–जायन्त भद्रा अमृतबन्धवः ॥13॥

कामो योनिः कमला वज्रपाणिर् गुहा हसा मातरि–श्वाभ्र–मिन्द्रः ।
पुनर्गुहा सकला मायया च पुरूच्यैषा विश्वमाता दिवि द्योम्॥14॥

एषात्मशक्तिः ।

एषा विश्वमोहिनी ।

पाशाङ्कुश–धनुर्बाण–धरा ।

एषा श्रीमहाविद्या ।

य एवं वेद ।

स शोकं तरति ॥15॥

नमस्ते अस्तु भगवति मातर–स्मान्पा–हि सर्वतः॥16॥

सै–षा–ष्टौ वसवः ।

सै–षै–का दश रुद्राः ।

सै–षा द्वादशादित्याः ।

सै–षा विश्वेदेवाः सोमपा असोमपाश्च ।

सैषा यातुधाना असुरा रक्षांसि पिशाचा–यक्षाः सिद्धाः ।

सै–षा सत्त्व–रजस्–तमांसि ।

सै–षा ब्रह्म विष्णु रुद्र रूपिणी ।

सै–षा प्रजापती–न्द्र–मनवः ।

सै–षा ग्रह–नक्षत्र–ज्योतींषि ।

कला–काष्ठादि–काल–रूपिणी ।

तामहं प्रणौमि नित्यम् ।

पापाप–हारिणीं देवीं भुक्ति–मुक्ति–प्रदायि–नीम् ।

अनन्तां विजयां शुद्धां शरण्यां शिवदां शिवाम् ॥17॥

वियदी–कार–संयुक्तं वीति–होत्र–समन्वितम् ।

अर्धेन्दु–लसितं देव्या बीजं सर्वार्थ–साधकम् ॥18॥

एवमे–काक्षरं ब्रह्म यतयः शुद्धचेतसः ।

ध्यायन्ति परमा–नन्द–मया ज्ञानांबु–राशयः ॥19॥

वाङ्मया ब्रह्म–सूस्त–स्मात् षष्ठं वक्त्र–समन्वितम् ।

सूर्योऽवाम–श्रोत्र–बिन्दुः संयुक्त–ष्टा–त्तृती–यकः॥20॥

नारायणेन सम्मिश्रो वायुश्चा–धरयुक्–ततः ।

विच्चे नवार्णकोऽर्णः–स्यान्– महदा–नन्द–दायकः ॥21॥

हृत्पुंडरीक–मध्यस्थां प्रातः–सूर्य–समप्रभाम् ।

पाशाङ्कुश–धरां सौम्यां वरदाभयहस्तकाम् ।
त्रिनेत्रां रक्तवसनां भक्तकाम दुघां भजे ॥22॥

नमामि त्वां महा देवीं महाभय–विनाशिनीम् ।
महा–दुर्ग–प्रशमनीं महा–कारुण्य–रूपिणीम् ॥23॥

यस्याः स्वरूपं ब्रह्मादयो न जानन्ति तस्मादुच्यते अज्ञेया ।
यस्या अन्तो न लभ्यते तस्मादुच्यते अनंता ।
यस्या लक्ष्यं नोप लक्ष्यते तस्मा दुच्यते अलक्ष्या ।
यस्या जननं नोपलभ्यते तस्मादुच्यते अजा ।
एकैव सर्वत्र वर्तते तस्मादुच्यते एका ।
एकैव विश्वरूपिणी तस्मादुच्यते नैका ।
अत एवोच्यते अज्ञेयानंता लक्ष्याजैका नैकेति ॥24॥

मन्त्राणां मातृका देवी शब्दानां ज्ञानरूपिणी ।
ज्ञानानां चिन्मयातीता शून्यानां शून्यसाक्षिणी ।
यस्याः परतरं नास्ति सैषा दुर्गा प्रकीर्तिता ॥25॥

तां दुर्गां दुर्गमां देवीं दुराचार–विघातिनीम् ।

नमामि भवभीतोऽहं संसारा–र्णव–तारिणीम् ॥26॥

इदम–थर्व–शीर्षं योऽधीते

स पञ्चा–थर्व–शीर्ष जप–फल–माप्नोति ।

इदम–थर्व–शीर्षमज्ञात्वा योऽर्चां स्थापयति ।

शतलक्षं प्रजप्त्वापि सोऽर्चासिद्धिं न विन्दति ।

शतमष्टोत्तरं चास्याः पुरश्चर्याविधिः स्मृतः ।

दशवारं पठेद्यस्तु सद्यः पापैः प्रमुच्यते ।

महादुर्गाणि तरति महादेव्याः प्रसादतः ॥27॥

साय मधीयानो दिवस कृतं पापं नाशयति ।

प्रातरधीयानो रात्रिकृतं पापं नाशयति ।

सायं प्रातः प्रयुञ्जानो अपापो भवति ।

निशीथे तुरीय संध्यायां जप्त्वा वाक्सिद्धिर् भवति ।

नूतनायां प्रतिमायां जप्त्वा देवतासान्निध्यं भवति ।

प्राणप्रतिष्ठायां जप्त्वा प्राणानां प्रतिष्ठा भवति ।

भौमाश्विन्यां महादेवी संनिधौ जप्त्वा महामृत्युं तरति ।

स महामृत्युं तरति ।

य एवं वेद इत्युपनिषत् ॥28॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवागं सस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न
इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्ताक्ष्यो
अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

*****

# ॥ सहस्र चण्डी होम सङ्कल्पः ॥

*प्राणायामम् 3 times*

ममोपात्त समस्त दुरित क्षय द्वारा, श्री परमेश्वर प्रीत्यर्थं
श्री महाकाली श्री महालक्ष्मी श्री महासरस्वती स्वरूपिणी चण्डिका महालक्ष्मी प्रसाद सिद्ध्यर्थं, तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव विद्याबलं दैवबलं तदेव लक्ष्मीपते ते अङ्घ्रियुगं स्मरामि ॥

शुभे शोभने मुहूर्ते,
अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा,
यः स्मरेत् पुण्डरीकाक्षं सः बाह्याभ्यन्तरः शुचिः ॥

मानसं वाचिकं पापं कर्मणा समुपार्जितं, श्री राम स्मरणेनैव व्यपोहति न संशयः । श्री राम राम राम ॥

तिथिर्विष्णुः तथा वारः नक्षत्रं विष्णुरेवच, योगश्च करणश्चैव सर्वं श्री विष्णु मयं जगत् । श्री गोविन्द गोविन्द गोविन्द ॥

अस्य श्री भगवतः महाविष्णोः आदि पुरुषस्य आज्ञया, प्रवर्त मानस्य शुभयोग शुभ करण एवं गुण विशेषण विशिष्टायां अस्यां वर्तमानायां शुभ तिथौ अस्माकं सर्वेषां सह कुटुम्बानां क्षेमस्थैर्यादि सर्वाभीष्ट सिद्ध्यर्थं धर्मार्थ

काम मोक्षादि निखिल चतुर्विध पुरुषार्थ सिद्ध्यर्थं, सर्वेषां जन्मलग्न जन्मराशि वशात्, नामलग्न नामराशि वशाच्च, महा दशादि बहुविध दशापहार छिद्र सूक्ष्म प्राणादि वशाच्च, गोचार वशाच्च, ये ये ग्रहाः स्थिति भाव आलोक योग कारगता आधिपत्यादिभिः प्रतिकूलाः, तेषां ग्रहाणां आनुकूल्य सिद्यर्थं, ये ये ग्रहाः स्थिति भाव आलोक योगकारगता आधिपत्यादिभिः अनुकूलाः, तेषां ग्रहाणां अतिशयित शुभ फल प्रदादृत्व सिद्ध्यर्थं, आयुः, आरोग्य, सौभाग्य, बल, श्री, कीर्ति, भाग्य, धन, धान्य, मणी, वस्त्र, भूषण, गृह, ग्राम, महाराज्य, साम्राज्यादि समस्त निखिलसुख अवाप्त्यर्थं, शरीराश्रित समस्तरोग, व्याधि, बाधा निवृत्ति द्वारा क्षिप्र आरोग्य सिद्ध्यर्थं, मनश्चिन्तित सकल कार्याणि शीघ्रमेव जयानुकूल्य सिद्ध्यर्थं, अस्मत् गुरु वर्याणां, श्रीविद्या पीठाधिपानां, श्रीविद्या गुरूणां, श्री भास्कर प्रकाश आश्रम अधिष्ठापनाचार्यानां, श्री विमर्शानन्दनाथेन्द्र सरस्वती महास्वामिनां पूर्ण कृपाविशेष अनुग्रह पुरस्सरं, समस्त गुरुमण्डल स्मरण वन्दन पूर्वकं, श्री विघ्नेश्वरादि त्रयः त्रिंशत् कोटि देवतानां, प्रसाद पूर्वकं, अत्र सन्निहितानां, श्रोत्रियाणां, महनीयाणां, समस्त आस्तिक महाजनानां च आशीर्वाद पूर्वकं, श्री सद्गुरु चरणारविन्द वन्दन पूर्वकं, महताप्रोत्साहेन, श्री सहस्र चण्डी हवन तदङ्गत्वेन, न्यास, मूलमन्त्र जप, पूजा, पारायण, स्तोत्र पठनादिकं अद्य करिष्ये ॥

*****

## ॥ मातृका न्यासम् ॥

**आदौ ऋष्यादि न्यासः। तद्यथा**

ब्रह्म विष्णु रुद्र ऋषिभ्यो नमः - शिरसि

गायत्र्युष्णिग्-अनुष्टुप् छन्देभ्यो नमः - मुखे

महाकाली महालक्ष्मी महासरस्वती देवताभ्यो नमः - हृदि

ऐं बीजाय नमः - गुह्ये

ह्रीं शक्तये नमः - पादयोः

क्लीं कीलकाय नमः - नाभौ।

अतः मातृका न्यासः।

**आदौ दुर्गा मातृका न्यासः**

अस्यश्री महादुर्गा मातृका महामन्त्रस्य,

ब्रह्मा-ऋषिः - शिरसि

गायत्री-छन्दः - मुखे

श्री महादुर्गा स्वरूपिणी मातृका सरस्वती-देवता - हृदि

ह्रां बीजं, ह्रीं शक्तिः, ह्रूं कीलकम्

महादुर्गा प्रसाद सिध्यर्थे महादुर्गा मातृका न्यासे विनियोगः।

**समस्त मातृकाभिः त्रिः-व्यापकं कृत्वा, करषडङ्गन्यासादिकं कृत्वा**

अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं

एं ऐं ओं औं अं अः

कं खं गं घं ङं

चं छं जं झं ञं

टं ठं डं ढं णं

तं थं दं धं नं

पं फं बं भं मं

यं रं लं वं शं षं सं हं ळं क्षं नमः

**तध्यथा**

ह्रीं श्रीं अं कं खं गं घं ङं आं अङ्गुष्ठाभ्यां नमः

ह्रीं श्रीं इं चं छं जं झं ञं ईं तर्जनीभ्यां नमः

ह्रीं श्रीं उं टं ठं डं ढं णं ऊं मध्यमाभ्यां नमः

ह्रीं श्रीं एं तं थं दं धं नं ऐं अनामिकाभ्यां नमः

ह्रीं श्रीं ओं पं फं बं भं मं औं कनिष्ठिकाभ्यां नमः

ह्रीं श्रीं अं यं रं लं वं शं षं सं हं ळं क्षं अः

करतल करपृष्ठाभ्यां नमः

ह्रीं श्रीं अं कं खं गं घं ङं आं हृदयाय नमः

ह्रीं श्रीं इं चं छं जं झं ञं ईं शिरसे स्वाहा

ह्रीं श्रीं उं टं ठं दं ढं णं ऊं शिखायै वषट्

ह्रीं श्रीं एं तं थं दं धं नं ऐं कवचाय हुं

ह्रीं श्रीं ओं पं फं बं भं मं औं नेत्रत्रयाय वौषट्

ह्रीं श्रीं अं यं रं लं वं शं षं सं हं ळं क्षं अः अस्त्राय फट्

## ध्यानम्

खड्गं-चक्र-गदेषु-चाप-परिघाञ्शूलं-भुशुण्डीं-शिरः,
शङ्खं सन्दधतीं करैस्त्रिनयनां सर्वाङ्ग भूषावृताम् ।
नीलाश्मद्युतिमास्य पाद दशकां सेवे महा कालिकां
यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम्।

## पञ्चपूजा

| | |
|---|---|
| लं पृथिव्यात्मने | गन्धं कल्पयामि |
| हं आकाशात्मने | पुष्पं कल्पयामि |
| यं वाय्वात्मने | धूपं कल्पयामि |
| रं अग्न्यात्मने | दीपं कल्पयामि |
| वं अमृतात्मने | नैवेद्यं कल्पयामि |
| सं सर्वात्मने | सर्वोपचारं कल्पयामि |

## अथ वक्ष्यमाण स्थानेषु मातृकां न्यासेत्

| | |
|---|---|
| ह्रीं श्रीं दुं दुर्गायै नमः अं दुर्गायै नमः | शिरशि |
| ह्रीं श्रीं दुं दुर्गायै नमः आं कौशिकायै नमः | मुखवृत्ते |
| ह्रीं श्रीं दुं दुर्गायै नमः इं उमायै नमः | दक्ष नेत्रे |
| ह्रीं श्रीं दुं दुर्गायै नमः ईं चण्डायै नमः | वाम नेत्रे |
| ह्रीं श्रीं दुं दुर्गायै नमः उं माहेश्वर्यै नमः | दक्ष कर्णे |

| | |
|---|---|
| ह्रीं श्रीं दुं दुर्गायै नमः ऊं शिवायै नमः | वाम कर्णे |
| ह्रीं श्रीं दुं दुर्गायै नमः ऋं विश्वेश्वर्यै नमः | दक्ष नासा पुटे |
| ह्रीं श्रीं दुं दुर्गायै नमः ॠं जगद्धात्र्यै नमः | वाम नासा पुटे |
| ह्रीं श्रीं दुं दुर्गायै नमः लृं स्थिति-संहार कारिण्यै नमः | दक्ष गण्डे |
| ह्रीं श्रीं दुं दुर्गायै नमः ॡं योग निद्रायै नमः | वाम गण्डे |
| ह्रीं श्रीं दुं दुर्गायै नमः एं भगवत्यै नमः | ऊर्ध्वोष्टे |
| ह्रीं श्रीं दुं दुर्गायै नमः ऐं देव्यै नमः | अधोरोष्टे |
| ह्रीं श्रीं दुं दुर्गायै नमः ओं स्वाहायै नमः | ऊर्ध्व दन्तपङ्क्तौ |
| ह्रीं श्रीं दुं दुर्गायै नमः औं स्वधायै नमः | अधो दन्तपङ्क्तौ |
| ह्रीं श्रीं दुं दुर्गायै नमः अं सुधायै नमः | जिह्वाग्रे |
| ह्रीं श्रीं दुं दुर्गायै नमः अः सृष्टिराहुत्यै नमः | ब्रह्म रन्द्रे |
| ह्रीं श्रीं दुं दुर्गायै नमः कं कलायै नमः | दक्ष बाहु मूले |
| ह्रीं श्रीं दुं दुर्गायै नमः खं मायायै नमः | दक्षकूर्परे |
| ह्रीं श्रीं दुं दुर्गायै नमः गं रमायै नमः | दक्षमणि बन्धे |
| ह्रीं श्रीं दुं दुर्गायै नमः घं ज्येष्टायै नमः | दक्ष कराङ्गुलिमूले |
| ह्रीं श्रीं दुं दुर्गायै नमः ङं स्मृत्यै नमः | दक्ष कराङ्गुल्यग्रे |
| ह्रीं श्रीं दुं दुर्गायै नमः चं पुष्ट्यै नमः | वाम बाहु मूले |
| ह्रीं श्रीं दुं दुर्गायै नमः छं स्थित्यै नमः | वाम कूर्परे |
| ह्रीं श्रीं दुं दुर्गायै नमः जं गत्यै नमः | वाम मणि बन्धे |

| | |
|---|---|
| ह्रीं श्रीं दुं दुर्गायै नमः झं रत्यै नमः | वाम कराङ्गुलिमूले |
| ह्रीं श्रीं दुं दुर्गायै नमः ञं प्रीत्यै नमः | वाम कराङ्गुल्यग्रे |
| ह्रीं श्रीं दुं दुर्गायै नमः टं धृत्यै नमः | दक्षोरु मूले |
| ह्रीं श्रीं दुं दुर्गायै नमः ठं नीत्यै नमः | दक्ष जानुनि |
| ह्रीं श्रीं दुं दुर्गायै नमः डं विभूत्यै नमः | दक्ष गुल्फे |
| ह्रीं श्रीं दुं दुर्गायै नमः ढं भूत्यै नमः | दक्ष पादाङ्गुलिमूले |
| ह्रीं श्रीं दुं दुर्गायै नमः णं उन्नत्यै नमः | दक्षपादाङ्गुल्यग्रे |
| ह्रीं श्रीं दुं दुर्गायै नमः तं क्षित्यै नमः | वामोरु मूले |
| ह्रीं श्रीं दुं दुर्गायै नमः थं क्षान्त्यै नमः | वाम जानुनि |
| ह्रीं श्रीं दुं दुर्गायै नमः दं क्षुत्यै नमः | वाम गुल्फे |
| ह्रीं श्रीं दुं दुर्गायै नमः धं कान्त्यैनमः | वाम पादाङ्गुलिमूले |
| ह्रीं श्रीं दुं दुर्गायै नमः नं शान्त्यैनमः | वाम पादाङ्गुल्यग्रे |
| ह्रीं श्रीं दुं दुर्गायै नमः पं क्लान्त्यै नमः | दक्ष पार्श्वे |
| ह्रीं श्रीं दुं दुर्गायै नमः फं महाध्युत्यै नमः | वाम पार्श्वे |
| ह्रीं श्रीं दुं दुर्गायै नमः बं क्षुधायै नमः | पृष्ठे |
| ह्रीं श्रीं दुं दुर्गायै नमः भं पिपासायै नमः | नाभौ |
| ह्रीं श्रीं दुं दुर्गायै नमः मं स्पृहायै नमः | जठरे |
| ह्रीं श्रीं दुं दुर्गायै नमः यं लज्जायै नमः | हृदये |
| ह्रीं श्रीं दुं दुर्गायै नमः रं निद्रायै नमः | दक्ष स्कन्धे |

ह्लीं श्रीं दुं दुर्गायै नमः लं मुद्रायै नमः ककुदि
ह्लीं श्रीं दुं दुर्गायै नमः वं चिदात्मिकायै नमः वाम स्कन्धे
ह्लीं श्रीं दुं दुर्गायै नमः शं गिरिजायै नमः हृदयादि दक्ष कराङ्गुल्यंतं
ह्लीं श्रीं दुं दुर्गायै नमः षं भारत्यै नमः हृदयादिवाम कराङ्गुल्यंतं
ह्लीं श्रीं दुं दुर्गायै नमः सं लक्ष्म्यै नमः हृदयादिदक्ष पादाङ्गुल्यंतं
ह्लीं श्रीं दुं दुर्गायै नमः हं शच्यै नमः हृदयादि वामकराङ्गुल्यंतं
ह्लीं श्रीं दुं दुर्गायै नमः ळं संज्ञायै नमः नाभ्यादि पादांतं
ह्लीं श्रीं दुं दुर्गायै नमः क्षं विभावर्यै नमः नाभ्यादि मूर्ध्यन्तम्

**इति महादुर्गा मातृका न्यासः ॥**

## ॥ ततः सर्वाङ्ग न्यासः ॥

1. ओं खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा
शङ्खिनी चापिनी बाण-भुशुण्डी-परिघायुधा ।१।

2. सौम्या सौम्य-तराऽशेष-सौम्येभ्यस्त्वति-सुन्दरी
पराऽपराणां परमा त्वमेव परमेश्वरी ।२।

3. यच्च किंञ्चित् क्वचिद्वस्तु-सदसद्-ऽवाखिलात्मिके
तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा ।३।

4. यया त्वया जगत्-स्त्रष्टा जगत्-पात्यत्ति यो जगत्

सोऽपि निद्रावशं नीतः कस्त्वां स्तोतु-मिहेश्वरः ।४।

5. विष्णुः शरीर-ग्रहण-महमीशान एव च
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत् ।५।

**आद्यं बीजं (ऐं) कृष्ण तरं ध्यात्वा सर्वाङ्गे विन्यसामि**

6. ओं शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके
घण्टा स्वनेन नः पाहि चाप-ज्या-निःस्वनेन च ।१।

7. प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे
भ्रामणे-नात्मशूलस्य उत्तरस्यां तथेश्वरि ।२।

8. सौम्यानि यानिरूपाणि त्रैलोक्ये विचरन्ति ते
यानि चात्यर्थ-घोराणि तै रक्षास्मांस्तथा भुवम् ।३।

9. खड्ग-शूल-गदादीनि यानि चास्त्राणि तेऽम्बिके
कर-पल्लव-सङ्गीनि तैरस्मान् रक्ष सर्वतः ।४।

**द्वितीयं माया बीजं (ह्रीं) सूर्य सदृशं ध्यात्वा सर्वाङ्गे विन्यसामि**

10. सर्व-स्वरूपे सर्वेशे सर्व-शक्ति-समन्विते
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तुते ।५।

11. एतत् ते वदनं सौम्यं लोचन-त्रय-भूषितम्
पातु नः सर्व-भीतिभ्यः कात्यायनि नमोऽस्तुते ।६।

12. ज्वाला-कराल-मत्युग्र-मशेषासुर-सूदनम्
त्रिशूलं पातु नो भीतेर्-भद्रकालि नमोऽस्तुते ।७।

13. हिनस्ति दैत्य-तेजांसि स्वनेनापूर्य या जगत्
सा घण्टा पातु नो देवि पापेभ्योऽनः-सुतानिव ।८।

14. असुरासृग्-वसा-पङ्क-चर्चितस्ते करोज्वलः
शुभाय खड्गो भवतु चण्डिके त्वां नता वयम् ।९।

**तृतीयं काम बीजं (क्लीं) स्फटिकाभं ध्यात्वा सर्वाङ्गे विन्यसामि**
**इति सर्वाङ्ग न्यासः ॥**

**॥ अथ मूल षडङ्ग न्यासः ॥**

| | |
|---|---|
| ऐं | अङ्गुष्ठाभ्यां नमः |
| ह्रीं | तर्जनीभ्यां नमः |
| क्लीं | मध्यमाभ्यां नमः |
| चामुण्डायै | अनामिकाभ्यां नमः |
| विच्चे | कनिष्ठिकाभ्यां नमः |

ऐं ह्रीं क्लीं चामुण्डायै विच्चे करतल कर पृष्ठाभ्यां नमः

**॥ एवं हृदयादि न्यासः ॥**

| | |
|---|---|
| ऐं | हृदयाय नमः |
| ह्रीं | शिरसे स्वाहा |

क्लीं		शिखायै वषट्
चामुण्डायै	कवचाय हुं
विच्चे		नेत्रत्रयाय वौषट्
ऐं ह्रीं क्लीं चामुण्डायै विच्चे - अस्त्राय फट्

## ॥ ततोऽक्षर न्यासः ॥

ह्रीं श्रीं ऐं नमः  शिखायां
ह्रीं श्रीं ह्रीं नमः दक्ष नेत्रे
ह्रीं श्रीं क्लीं नमः वाम नेत्रे
ह्रीं श्रीं चां नमः दक्षिण कर्णे
ह्रीं श्रीं मुं नमः  वाम कर्णे
ह्रीं श्रीं डां नमः दक्ष नासिकायां
ह्रीं श्रीं यैं नमः  वाम नासिकायां
ह्रीं श्रीं विं नमः मुखे
ह्रीं श्रीं च्चें नमः  गुह्ये

## ॥ अथ मूलेन अष्टवारं व्यापकं विन्यस्य ॥

ऐं ह्रीं क्लीं चामुण्डायै विच्चे

## ॥ अथ दश दिङ्न्यासः ॥

ह्रीं श्रीं ऐं		प्राच्यै नमः

ह्रीं श्रीं ऐं        आग्नेय्यै नमः

ह्रीं श्रीं ह्रीं       दक्षिणायै नमः

ह्रीं श्रीं ह्रीं       निर्ऋत्यै नमः

ह्रीं श्रीं क्लीं       प्रतीच्यै   नमः

ह्रीं श्रीं क्लीं       वायव्यै नमः

ह्रीं श्रीं चामुण्डायै उदीच्यै नमः

ह्रीं श्रीं विच्चे      ईशान्यायै नमः

ह्रीं श्रीं ऐं ह्रीं क्लीं चामुण्डायै विच्चे ऊर्ध्वायै नमः

ह्रीं श्रीं ऐं ह्रीं क्लीं चामुण्डायै विच्चे भूम्यै नमः ।

**एते न्यासाः अवश्यकाः ॥**

*****

# ॥ सिद्धकुञ्जिका स्तोत्रम् ॥

ॐ शिव उवाच

1. श्रृणु देवि प्रवक्ष्यामि कुञ्जिका स्तोत्रमुत्तमम् ।
येन मन्त्र प्रभावेण चण्डीजापः शुभो भवेत्॥

2. न कवचं नार्गला स्तोत्रं कीलकं न रहस्यकम् ।
न सूक्तं नापि ध्यानं च न न्यासो न च वार्चनम्॥

3. कुञ्जिका पाठ मात्रेण दुर्गा पाठ फलं लभेत् ।
अति गुह्य तरं देवि देवानामपि दुर्लभं॥

4. गोपनीयं प्रयत्नेन स्वयोनिरिव पार्वति ।
मारणं मोहनं वश्यं स्तंभनोच्चाटनादिकम् ।
पाठमात्रेण संसिध्येत् कुञ्जिका स्तोत्रमुत्तमम्॥

***अथ मन्त्रः***

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे ।
ओं ग्लौं हुं क्लीं जूं सः ज्वालय ज्वालय ज्वल ज्वल प्रज्वल प्रज्वल ।
ऐं ह्रीं क्लीं चामुण्डायै विच्चे ।
ज्वल हं सं लं क्षं फट् स्वाहा ।

***॥इति मन्त्रः॥***

5. नमस्ते रुद्र रूपिण्यै नमस्ते मधुमर्दिनि।
नमःकैटभहारिण्यै नमस्ते महिषार्दिनि॥

6. नमस्ते शुम्भहन्त्र्यै च निशुम्भासुर घातिनि।
जाग्रतं हि महादेवि जपं सिद्धं कुरुष्वमे॥

7. ऐंकारी सृष्टि रूपायै ह्रींकारी प्रतिपालिका।
क्लींकारी कामरूपिण्यै बीजरूपे नमोऽस्तुते ॥

8. चामुण्डा चण्डघाती च यैकारी वरदायिनी।
विच्चे चाभयदा नित्यं नमस्ते मन्त्ररूपिणि॥

9. धां धीं धूं धूर्जटेः पत्नी वां वीं वूं वागधीश्वरी।
क्रां क्रीं क्रूं कालिका देवि शां शीं शूं मे शुभं कुरु॥

10. हुं हुं हुंकार रूपिण्यै जं जं जं जम्भनादिनी ।
भ्रां भ्रीं भ्रूं भैरवी भद्रे भवान्यै ते नमो नमः॥

11. अं कं चं टं तं पं यं शं वीं दुं ऐं वीं हं क्षं।
धिजाग्रं धिजाग्रं त्रोटय त्रोटय दीप्तं कुरु कुरु स्वाहा ॥

12. पां पीं पूं पार्वती पूर्णा खां खीं खूं खेचरी तथा।
सां सीं सूं सप्तशती देव्या मन्त्रसिद्धिं कुरुष्व मे॥

इदं तु कुञ्जिका स्तोत्रं मन्त्रजागर्तिहेतवे।
अभक्ते नैव दातव्यं गोपितं रक्ष पार्वति।
यस्तु कुञ्जिकया देवि हीनां सप्तशतीं पठेत्।
न तस्य जायते सिद्धिररण्ये रोदनं यथा॥

इति कुञ्जिका स्तोत्रम् ॥

*****

# ॥ देवी कवचम् ॥

अस्य श्री चण्डी कवचस्य । ब्रह्मा ऋषिः । अनुष्टुप् छन्दः । चामुण्डा देवता । अङ्गन्यासोक्त मातरो बीजम् । दिग्बन्ध देवतास्तत्वम् । श्री जगदम्बा प्रीत्यर्थे सप्तशती पाठाङ्गत्वेन जपे विनियोगः ॥

ॐ नमश्चण्डिकायै

मार्कण्डेय उवाच

1. ॐ यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम् ।
यन्नकस्यचिदाख्यातं तन्मे ब्रूहि पितामह॥

ब्रह्मोवाच

2. अस्ति गुह्यतमं विप्र सर्वभूतोपकारकम् ।
देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने॥

3. प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणी ।
तृतीयं चन्द्रघण्टेति कूष्माण्डेति चतुर्थकम्॥

4. पञ्चमं स्कन्दमातेति षष्ठं कात्यायनी तिच।
सप्तमं कालरात्रीति महागौरीति चाष्टमम्॥

5. नवमं सिद्धिदात्री च नवदुर्गाः प्रकीर्तिताः ।
उक्तान्येतानि नामानि ब्रह्मणैव महात्मना॥

6. अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे ।
विषमे दुर्गमे चैव भयार्ताः शरणं गताः ॥

7. न तेषां जायते किञ्चिदशुभं रणसङ्कटे ।
नापदं तस्य पश्यामि शोकदुःखभयं न हि ॥

8. यैस्तु भक्त्या स्मृता नूनं तेषां वृद्धिः प्रजायते ।
येत्वां स्मरन्ति देवेशि रक्षसे तान्न संशयः ॥

9. प्रेतसंस्था तु चामुण्डा वाराही महिषासना ।
ऐन्द्री गजसमारूढा वैष्णवी गरुडासना ॥

10. माहेश्वरी वृषारूढा कौमारी शिखिवाहना ।
लक्ष्मीः पद्मासना देवी पद्महस्ता हरिप्रिया ॥

11. श्वेतरूपधरा देवी ईश्वरी वृषवाहना ।
ब्राह्मी हंससमारूढा सर्वाभरणभूषिता ॥

12. इत्येता मातरः सर्वाः सर्वयोगसमन्विताः ।
नानाभरणशोभाढ्या नानारत्नोपशोभिताः ॥

13. दृश्यन्ते रथमारूढा देव्यः क्रोधसमाकुलाः ।
शङ्खं चक्रं गदां शक्तिं हलं च मुसलायुधम् ॥

14. खेटकं तोमरं चैव परशुं पाशमेव च।
कुन्तायुधं त्रिशूलं च शार्ङ्गमायुधमुत्तमम्॥

15. दैत्यानां देहनाशाय भक्तानामभयाय च।
धारयन्त्यायुधानीत्थं देवानां च हिताय वै॥

16. नमस्तेऽस्तु महारौद्रे महाघोरपराक्रमे।
महाबले महोत्साहे महाभयविनाशिनि॥

17. त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्धिनि ।
प्राच्यां रक्षतु मामैन्द्री आग्नेय्यामग्निदेवता॥

18. दक्षिणेऽवतु वाराही नैर्ऋत्यां खड्गधारिणी ।
प्रतीच्यां वारुणी रक्षेद् वायव्यां मृगवाहिनी॥

19. उदीच्यां पातु कौमारी ऐशान्यां शूलधारिणी ।
ऊर्ध्वं ब्रह्माणि मे रक्षेदधस्ताद् वैष्णवी तथा॥

20. एवं दश दिशो रक्षेच्चामुण्डा शववाहना ।
जया मे चाग्रतः पातु विजया पातु पृष्ठतः॥

21. अजिता वामपार्श्वे तु दक्षिणे चापराजिता ।
शिखामुद्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता॥

22. मालाधरी ललाटे च भ्रुवौ रक्षेद् यशस्विनी ।
त्रिनेत्रा च भ्रुवोर्मध्ये यमघण्टा च नासिके॥

23. शङ्खिणी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी ।
कपोलौ कालिका रक्षेत् कर्णमूलेतु शाङ्करी॥

24. नासिकायां सुगन्धाच उत्तरोष्ठेच चर्चिका ।
अधरे चामृतकला जिह्वायां च सरस्वती॥

25. दन्तान् रक्षतु कौमारी कण्ठदेशेतु चण्डिका।
घण्टिकां चित्रघण्टा च महामाया च तालुके॥

26. कामाक्षी चिबुकं रक्षेद् वाचं मे सर्वमङ्गला।
ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी॥

27. नीलग्रीवा बहिः कण्ठे नलिकां नलकूबरी ।
स्कन्धयोः खड्गिनी रक्षेद् बाहू मे वज्रधारिणी॥

28. हस्तयोर्दण्डिनी रक्षेदम्बिका चाङ्गुलीषु च।
नखाञ्छूलेश्वरी रक्षेत् कुक्षौ रक्षेत्कुलेश्वरी॥

29. स्तनौ रक्षेन्महादेवी मनः शोकविनाशिनी।
हृदये ललिता देवी उदरे शूलधारिणी॥

30. नाभौ च कामिनी रक्षेद् गुह्यं गुह्येश्वरी तथा।
पूतना कामिका मेढ्रं गुदे महिषवाहिनी॥

31. कट्यां भगवती रक्षेज्जानुनी विन्ध्यवासिनी।
जङ्घे महाबला रक्षेत् सर्वकामप्रदायिनी॥

32. गुल्फयोर्नारसिंही च पादपृष्ठे तु तैजसी।
पादाङ्गुलीषु श्री रक्षेत्पादाधस्तलवासिनी॥

33. नखान् दंष्ट्राकराली च केशांश्चैवोर्ध्वकेशिनी।
रोमकूपेषु कौबेरी त्वचं वागीश्वरी तथा॥

34. रक्तमज्जावसामांसान्यस्थिमेदांसि पार्वती।
अन्त्राणि कालरात्रिश्च पित्तं च मुकुटेश्वरी॥

35. पद्मावती पद्मकोशे कफे चूडामणिस्तथा।
ज्वालामुखी नखज्वालामभेद्या सर्वसन्धिषु॥

36. शुक्रं ब्रह्माणि मे रक्षेच्छायां छत्रेश्वरी तथा।
अहङ्कारं मनोबुद्धिं रक्षेन्मे धर्मधारिणी॥

37. प्राणापानौ तथा व्यानमुदानं च समानकम् ।
वज्रहस्ता च मे रक्षेत्प्राणं कल्याणशोभ ना॥

38. रसे रूपे च गन्धे च शब्दे स्पर्शे च योगिनी।
सत्वं रजस्तमश्चैव रक्षेन्नारायणी सदा॥

39. आयू रक्षतु वाराही धर्मं रक्षतु वैष्णवी।
यशः कीर्तिं च लक्ष्मीं च धनं विद्यां च चक्रिणी॥

40. गोत्रमिन्द्राणि मे रक्षेत्पशून्मे रक्ष चण्डिके।
पुत्रान् रक्षेन्महालक्ष्मीर्भार्यां रक्षतु भैरवी॥

41. पन्थानं सुपथा रक्षेन्मार्गं क्षेमकरी तथा।
राजद्वारे महालक्ष्मीर्विजया सर्वतः स्थिता॥

42. रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु।
तत्सर्वं रक्ष मे देवि जयन्ती पाप नाशिनी॥

43. पदमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः।
कवचेनावृतो नित्यं यत्र यत्रैव गच्छति॥

44. तत्र तत्रार्थलाभश्च विजयः सार्वकामिकः।
यं यं चिंतयते कामं तं तं प्राप्नोति निश्चितम्।
परमैश्वर्यमतुलं प्राप्स्यते भूतले पुमान्॥

45. निर्भयो जायते मर्त्यः सङ्ग्रामेष्वपराजितः।
त्रैलोक्ये तु भवेत्पूज्यः कवचेनावृतः पुमान्॥

46. इदं तु देव्याः कवचं देवानामपि दुर्लभम्।
यः पठेत्प्रयतो नित्यं त्रिसन्ध्यं श्रद्धयान्वितः॥

47. दैवीकला भवेत्तस्य त्रैलोक्येष्वपराजितः।
जीवेद्वर्ष शतं साग्रमपमृत्युविवर्जितः॥

48. नश्यन्ति व्याधयः सर्वे लूताविस्फोटकादयः।
स्थावरं जङ्गमं चैव कृत्रिमं चापि यद्विषम्॥

49. अभिचाराणि सर्वाणि मन्त्रयन्त्राणि भूतले।
भूचराः खेचराःश्चैव जलजाश्चोपदेशिकाः॥

50. सहजा कुलजा माला डाकिनी शाकिनी तथा।
अन्तरिक्षचरा घोरा डाकिन्यश्च महाबलाः॥

51. ग्रहभूतपिशाचाश्च यक्षगन्धर्वराक्षसाः।
ब्रह्मराक्षसवेतालाः कूष्माण्डा भैरवादयः॥

52. नश्यन्ति दर्शनात्तस्य कवचे हृदि संस्थिते।
मानोन्नतिर्भवेद्राज्ञ स्तेजोवृद्धिकरं परम्॥

53. यशसा वर्धते सोऽपि कीर्तिमण्डितभूतले।
जपेत्सप्तशतीं चण्डीं कृत्वातु कवचं पुरा॥

54. यावद्भूमण्डलं धत्ते सशैलवनकाननम्।
तावत्तिष्ठति मेदिन्यां सन्ततिः पुत्रपौत्रिकी॥

55. देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम्।
प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः॥

56. लभते परमं रूपं शिवेन सहमोदते॥

इति श्री देवीकवचम् ॥

*****

# ॥ अर्गला स्तोत्रम् ॥

अस्यश्री मदर्गला-स्तोत्र-महामन्त्रस्य । विष्णुः-ऋषिः । अनुष्टुप् छन्दः । श्रीमहालक्ष्मीः देवता । श्री जगदम्बा-प्रीतये सप्तशती-पाठाङ्गत्वेन जपे विनियोगः ॥

ॐ नमश्चण्डिकायै

मार्कण्डेय उवाच

1. ॐ जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तुते॥

2. जय त्वं देवि चामुण्डे जयभूतार्तिहारिणि।
जय सर्वगते देवि कालरात्रि नमोऽस्तुते॥

3. मधुकैटभविद्राविविधातृ वरदे नमः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

4. महिषासुरनिर्णाशि भक्तानां सुखदे नमः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

5. रक्तबीजवधे देवि चण्डमुण्डविनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

6. शुम्भस्यैव निशुम्भस्य धूम्राक्षस्य च मर्दिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

7. वन्दि तांघ्रियुगे देवि सर्वसौभाग्यदायिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

8. अचिंत्यरूपचरिते सर्वशत्रुविनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

9. नतेभ्यःसर्वदाभक्त्या चण्डिके दुरितापहे ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

10. स्तुवद्भ्योभक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

11. चण्डिके सततं ये त्वामर्चयन्तीह भक्तितः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

12. देहि सौभाग्यमारोग्यं देहि मे परमं सुखम् ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

13. विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

14. विधेहि देवि कल्याणं विधेहि परमां श्रियं ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

15. सुरासुरशिरोरत्न निघृष्टचरणेऽम्बिके ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

16. विद्यावन्तं यशस्वन्तं लक्ष्मीवंतं जनं कुरु ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

17. प्रचण्डदैत्यदर्पघ्ने चण्डिके प्रणताय मे ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

18. चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

19. कृष्णेन संस्तुते देवि शश्वद्भक्त्या सदाऽम्बिके ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

20. हिमाचलसुतानाथसंस्तुते परमेश्वरि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

21. इन्द्राणीपतिसद्भावपूजिते परमेश्वरि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

22. देवि प्रचण्डदोर्दण्डदैत्यदर्पविनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥

23. देवि भक्तजनोद्दामदत्तानन्दोदयेऽम्बिके ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥

24. पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीं ।
तारिणीं दुर्गसंसार सागरस्य कुलोद्भवाम् ॥

25. इदंस्तोत्रं पठित्वातु महास्तोत्रं पठेन्नरः ।
स तु सप्तशतीसङ्ख्यावरमाप्नोतिसम्पदाम् ॥

इति श्री अर्गला स्तोत्रम् ॥

*****

## ॥ कीलक स्तोत्रम् ॥

अस्य श्री कीलक मन्त्रस्य । शिव ऋषिः । अनुष्टुप् छन्दः । श्री महा सरस्वतीदेवता । श्रीजगदम्बा प्रीत्यर्थं सप्तशतीपाठाङ्गत्वेन जपे विनियोगः ॥

ॐ नमश्चण्डिकायै

मार्कण्डेय उवाच

1. ॐ विशुद्ध ज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ।
श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे ॥

2. सर्वमेतद् विजानीयान् मन्त्राणामभिकीलकं ।
सोऽपि क्षेममवाप्नोति सततं जाप्यतत्परः ॥

3. सिद्ध्यन्त्युच्चाटनादीनि वस्तूनि सकलान्यपि ।
एतेन स्तुवतां देवी स्तोत्रमात्रेण सिद्ध्यति ॥

4. न मन्त्रो नौषधं तत्र न किञ्चिदपि विद्यते ।
विना जाप्येन सिद्ध्येत सर्वमुच्चाटनादिकम् ॥

5. समग्राण्यपि सिद्ध्यंति लोकशङ्कामिमां हरः ।
कृत्वा निमन्त्रयामास सर्वमेवमिदं शुभम् ॥

6. स्तोत्रं वै चण्डिकायास्तु तच्च गुप्तं चकार सः ।

समाप्तिर्न च पुण्यस्य तां यथावन्निमन्त्रणां॥

7. सोऽपि क्षेममवाप्नोति सर्वमेवं न संशयः ।
कृष्णायां वा चतुर्दश्यामष्टम्यां वा समाहितः॥

8. ददाति प्रतिगृह्णाति नान्यथैषा प्रसीदति ।
इत्थं रूपेण कीलेन महादेवेन कीलितम्॥

9. यो निष्कीलां विधायैनां नित्यं जपति संस्फुटं
स सिद्धः स गणः सोऽपि गन्धर्वो जायते नरः॥

10. न चैवाप्यटतस्तस्य भयं क्वापीह जायते ।
नापमृत्यु वशं याति मृतो मोक्षमवाप्नुयात् ॥

11. ज्ञात्वा प्रारभ्य कुर्वीत नकुर्वाणो विनश्यति ।
ततो ज्ञात्वैव सम्पन्नं इदं प्रारभ्यते बुधैः॥

12. सौभाग्यादि च यत्किञ्चिद् दृश्यते ललनाजने ।
तत्सर्वं तत्प्रसादेन तेन जाप्यमिदं शुभं॥

13. शनैस्तु जप्यमानेऽस्मिन् स्तोत्रे सम्पत्तिरुच्चकैः ।
भवत्येव समग्रापि ततः प्रारभ्यमेव तत्॥

14. ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसम्पदः।

शत्रुहानिः परो मोक्षः स्तूयते सा न किं जनैः ॥

इति श्री भगवती कीलक स्तोत्रम् ॥

*****

# ॥ रात्रि सूक्तम् ॥

1. विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ।
निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ॥

ब्रह्मोवाच

2. त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ।
सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता ॥

3. अर्धमात्रास्थिता नित्या याऽनुच्छार्या विशेषतः ।
त्वमेव सन्ध्या सावित्री त्वं देवि जननी परा ॥

4. त्वयैतद् धार्यते विश्वं त्वयैतत् सृज्यते जगत् ।
त्वयैतत् पाल्यते देवि त्वमत्स्यन्ते च सर्वदा ॥

5. विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ।
तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये ॥

6. महाविद्या महामाया महामेधा महास्मृतिः ।
महामोहा च भवती महादेवी महाऽसुरी ॥

7. प्रकृति स्त्वं च सर्वस्य गुणत्रयविभाविनी ।
कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ॥

8. त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ।

लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च॥

9. खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ।
शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा॥

10. सौम्या सौम्यतराऽशेषसौम्येभ्यस्त्वतिसुन्दरी ।
पराऽपराणां परमा त्वमेव परमेश्वरी॥

11. यच्च किञ्चित् क्वचिद्वस्तु सदसद्वाऽखिलात्मिके ।
तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा॥

12. यया त्वया जगत्स्रष्टा जगत्पात्यऽत्ति यो जगत् ।
सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः॥

13. विष्णुः शरीरग्रहणमहमीशान एव च ।
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत्॥

14. सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ।
मोहयैतौ दुराधर्षा वसुरौ मधुकैटभौ॥

15. प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु ।
बोधश्च क्रियतामस्य हन्तुमेतौ महाऽसुरौ॥

इति पौराणिक रात्रि सूक्तम् ॥

*****

# ॥ नवाक्षरी महामन्त्रम् ॥

अस्य श्रीनवाक्षरी महामन्त्रस्य । ब्रह्म-विष्णुः-रुद्रा ऋषयः (शिरसि)। गायत्र्युष्णि-गनुष्टुभ-श्छन्दांसि (मुखे) । श्रीमहाकाली-महालक्ष्मी-महासरस्वत्यो देवताः (हृदये)। ऐं बीजम्, ह्रीं शक्तिः, क्लीं कीलकं । श्रीमहाकाली-महालक्ष्मी-महासरस्वती प्रीत्यर्थे जपे विनियोगः ॥

## करन्यासः

| | |
|---|---|
| ऐं | अङ्गुष्ठाभ्यां नमः |
| ह्रीं | तर्जनीभ्यां नमः |
| क्लीं | मध्यमाभ्यां नमः |
| चामुण्डायै | अनामिकाभ्यां नमः |
| विच्चे | कनिष्ठिकाभ्यां नमः |

ऐं ह्रीं क्लीं चामुण्डायै विच्चे करतलकरपृष्ठाभ्यां नमः

## षडङ्गन्यासः

| | |
|---|---|
| ऐं | हृदयाय नमः |
| ह्रीं | शिरसे स्वाहा |
| क्लीं | शिखायै वषट् |
| चामुण्डायै | कवचाय हुं |
| विच्चे | नेत्रत्रयाय वौषट् |

ऐं ह्रीं क्लीं चामुण्डायै विच्चे अस्त्राय फट्

ओं भूर्भुवस्सुवरोमिति दिग्बन्धः ।

## ध्यानम्

खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुण्डीं शिरः,
शङ्खं सन्दधतीं करैस्त्रिनयनां सर्वाङ्ग-भूषावृताम् ।
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां
यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम् ॥

अक्षस्त्रक्परशुं गदेषुकुलिशं पद्मं धनुः कुण्डिकां,
दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम् ।
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रसन्नाननां,
सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥

घण्टाशूलहलानि शङ्खमुसले चक्रं धनुः सायकं,
हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभां ।
गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महा-
पूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीं ॥

## पञ्चपूजा

| | | | |
|---|---|---|---|
| लं पृथिव्यात्मने | गन्धं कल्पयामि | रं अग्नियात्मने | दीपं कल्पयामि |
| हं आकाशात्मने | पुष्पं कल्पयामि | वं अमृतात्मने | अमृतं कल्पयामि |
| यं वाय्वात्मने | धूपं कल्पयामि | सं सर्वात्मने | सर्वोपचारान् समर्पयामि |

*****

# ॥ मातृकाऽक्षरसहित नवाक्षरीमहामन्त्र जपः ॥

| | | |
|---|---|---|
| 1 | अं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 2 | आं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 3 | इं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 4 | ईं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 5 | उं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 6 | ऊं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 7 | ऋं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 8 | ॠं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 9 | ऌं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 10 | ॡं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 11 | एं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 12 | ऐं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 13 | ओं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 14 | औं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 15 | अं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 16 | अः | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 17 | कं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 18 | खं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 19 | गं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 20 | घं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 21 | ङं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 22 | चं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 23 | छं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 24 | जं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 25 | झं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 26 | ञं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 27 | टं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 28 | ठं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 29 | डं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 30 | ढं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 31 | णं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 32 | तं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 33 | थं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 34 | दं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 35 | धं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 36 | नं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 37 | पं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 38 | फं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 39 | बं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 40 | भं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 41 | मं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 42 | यं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 43 | रं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 44 | लं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 45 | वं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 46 | शं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 47 | षं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 48 | सं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 49 | हं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 50 | ळं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |

**क्षं**

Note: Here the अक्षर is prefixed to the मन्त्रम् moving forward in the अक्षर माल

| | | |
|---|---|---|
| 51 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | ळं |
| 52 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | हं |
| 53 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | सं |
| 54 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | षं |
| 55 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | शं |
| 56 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | वं |
| 57 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | लं |
| 58 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | रं |
| 59 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | यं |
| 60 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | मं |
| 61 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | भं |
| 62 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | बं |
| 63 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | फं |
| 64 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | पं |
| 65 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | नं |
| 66 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | धं |
| 67 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | दं |
| 68 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | थं |
| 69 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | तं |
| 70 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | णं |
| 71 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | ढं |
| 72 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | डं |
| 73 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | ठं |
| 74 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | टं |
| 75 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | ञं |
| 76 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | झं |
| 77 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | जं |
| 78 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | छं |
| 79 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | चं |
| 80 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | ङं |
| 81 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | घं |
| 82 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | गं |
| 83 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | खं |
| 84 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | कं |
| 85 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | अः |
| 86 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | अं |
| 87 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | औं |
| 88 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | ओं |
| 89 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | ऐं |
| 90 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | एं |
| 91 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | ॡं |
| 92 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | ऌं |
| 93 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | ॠं |
| 94 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | ऋं |
| 95 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | ऊं |
| 96 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | उं |
| 97 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | ईं |
| 98 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | इं |
| 99 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | आं |
| 100 | ऐं ह्रीं क्लीं चामुण्डायै विच्चे | अं |

Note: Here the अक्षर is suffixed to the मन्त्रम् moving backward in the अक्षर माल

| | | |
|---|---|---|
| 101 | अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 102 | कं खं गं घं ङं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 103 | चं छं जं झं ञं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 104 | टं ठं डं ढं णं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 105 | तं थं दं धं नं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 106 | पं फं बं भं मं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 107 | यं रं लं वं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 108 | शं षं सं हं ळं क्षं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |

*****

## ॥ सप्तशती माला मन्त्र विधिः ॥

प्रथम-मध्यमोत्तरचरित्राणां ब्रह्मविष्णुरुद्रा ऋषयः।
श्री महाकालीमहालक्ष्मीमहासरस्वत्यो देवताः (हृदये) ।
गायत्र्युष्णिगनुष्टुभश्छन्दांसि नन्दाशाकंभरी भीमा शक्तयः (दक्षिणस्तने) ।
रक्तदंतिकादुर्गाभ्रामर्यो बीजानि(वामस्तने)। अग्निवायुसूर्यास्तत्वानि ।
ऋग्यजुःसामवेदा ध्यानानि । सकलकामनासिद्धये
श्रीमहाकालीमहालक्ष्मीमहासरस्वतीदेवताः प्रीत्यर्थे जपे विनियोगः ।

### सप्तशती माला मन्त्र न्यासम्

### करन्यासः

ॐ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा
शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा। अङ्गुष्ठाभ्यां नमः।

ॐ शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च। तर्जनीभ्यां नमः।

ॐ प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि। मध्यमाभ्यां नमः।

ॐ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ।
यानि चात्यर्थघोराणि तैः रक्षास्मांस्तथा भुवम्। अनामिकाभ्यांनमः।

ॐ खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ।
करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः । कनिष्ठिकाभ्यां नमः ।

ॐ सर्वस्वरूपे सर्वेशे सर्वशक्ति समन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गेदेवि नमोऽस्तुते ।करतलकरपृष्ठाभ्यांनमः ।

**षडङ्गन्यासः**

ॐ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ।
शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा। हृदयाय नमः ।

ॐ शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च। शिरसे स्वाहा ।

ॐ प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि । शिखायै वषट् ।

ॐ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्तिते
यानि चात्यर्थघोराणि तैः रक्षास्मांस्तथा भुवम् । कवचाय हुं ।

ॐ खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ।
करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः । नेत्रत्रयाय वौषट् ।

ॐ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोस्तुते । अस्त्राय फट् ।

ॐ भूर्भुवस्सुवरोमिति दिग्बन्धः ।

## ध्यानम्

ॐ विद्युद्दामसमप्रभां मृगपतिस्कंधस्थितां भीषणां
कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ।
हस्तैश्चक्रगदासिखेटविशिखांश्चापं गुणं तर्जनीं
बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे॥

## पञ्चपूजा

| | | | |
|---|---|---|---|
| लं पृथिव्यात्मने | गन्धं कल्पयामि | रं अग्नियात्मने | दीपं कल्पयामि |
| हं आकाशात्मने | पुष्पं कल्पयामि | वं अमृतात्मने | अमृतं कल्पयामि |
| यं वाय्वात्मने | धूपं कल्पयामि | सं सर्वात्मने | सर्वोपचारान् समर्पयामि |

*****



©Bhaskara Prakasha Ashram

# ॥ अथ प्रथम चरित्रम् ॥

## प्रथमोऽध्यायः

## मधुकैटभ वधः

ॐ नमश्चण्डिकायै ।

1. ॐ ऐं मार्कण्डेय उवाच॥ (1)

2. सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ।
निशामय तदुत्पत्तिं विस्तराद् गदतो मम॥ (2)

3. महामायानुभावेन यथा मन्वन्तराधिपः ।
स बभूव महाभागः सावर्णिस्तनयो रवेः॥ (3)

4. स्वारोचिषेऽन्तरे पूर्वं चैत्रवंशसमुद्भवः ।
सुरथो नाम राजाभूत् समस्ते क्षितिमण्डले॥ (4)

5. तस्य पालयतः सम्यक् प्रजाः पुत्रानिवौरसान् ।
बभूवुः शत्रवो भूपाः कोलाविध्वंसिनस्तदा॥ (5)

6. तस्य तैरभवद् युद्धमतिप्रबलदण्डिनः ।
न्यूनैरपि स तैर्युद्धे कोलाविध्वंसिभिर्जितः॥ (6)

7. ततः स्वपुरमायातो निजदेशाधिपोऽभवत् ।
आक्रान्तः स महाभागस्तैस्तदा प्रबलारिभिः ॥ (7)

8. अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्य दुरात्मभिः ।
कोशो बलं चापहृतं तत्रापि स्वपुरे ततः ॥ (8)

9. ततो मृगयाव्याजेन हृतस्वाम्यः स भूपतिः ।
एकाकी हयमारुह्य जगाम गहनं वनम् ॥ (9)

10. स तत्राश्रममद्राक्षीद् द्विजवर्यस्य मेधसः ।
प्रशान्तश्वापदाकीर्णं मुनिशिष्योपशोभितम् ॥ (10)

11. तस्थौ कञ्चित् स कालं च मुनिना तेन सत्कृतः ।
इतश्चेतश्च विचरंस्तस्मिन् मुनिवराश्रमे ॥ (11)

12. सोऽचिन्तयत्तदा तत्र ममत्वाकृष्टचेतनः ।
मत्पूर्वैः पालितं पूर्वं मयाहीनं पुरं हि तत् ॥ (12)

13. मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतः पाल्यते न वा
न जाने स प्रधानो मे शूरहस्ती सदामदः ॥ (13)

14. मम वैरिवशं यातः कान् भोगानुपलप्स्यते ।
ये ममा नुगता नित्यं प्रसादधनभोजनैः ॥ (14)

15. अनुवृत्तिं ध्रुवं तेऽद्य कुर्वन्त्यन्यमहीभृताम् ।
असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययम्॥ (15)

16. संचितः सोऽतिदुःखेन क्षयं कोशो गमिष्यति ।
एतच्चान्यच्च सततं चिन्तया मास पार्थिवः॥ (16)

17. तत्र विप्रा श्रमाभ्याशे वैश्यमेकं ददर्श सः ।
स पृष्टस्तेन कस्त्वं भो हेतुश्चागमनेऽत्र कः॥ (17)

18. सशोक इव कस्मात्त्वं दुर्मना इव लक्ष्यसे ।
इत्याकर्ण्य वचस्तस्य भूपतेः प्रण योदितम्॥ (18)

19. प्रत्युवाच सतं वैश्यः प्रश्रयावनतो नृपम्॥ (19)

20. वैश्य उवाच॥ (20)

21. समाधिर्नाम वैश्योऽहमुत्पन्नो धनिनां कुले॥ (21)

22. पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिः ।
विहीनश्च धनैर्दारैः पुत्रैरादाय मे धनम्॥ (22)

23. वनमभ्यागतो दुःखी निरस्तश्चाप्तबंधुभिः ।
सोऽहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकाम्॥ (23)

24. प्रवृत्तिं स्वजनानां च दाराणां चात्र संस्थितः ।

किं नु तेषां गृहेक्षेममक्षेमं किं नु साम्प्रतम्॥ (24)

25. कथं ते किं नु सद्वृत्ता दुर्वृत्ताः किं नु मे सुताः॥ (25)

26. राजोवाच॥ (26)

27. यैर्निरस्तो भवांल्लुब्धैः पुत्रदारादिभिर्धनैः॥ (27)

28. तेषु किं भवतः स्नेहमनुबध्नाति मानसम्॥ (28)

29. वैश्य उवाच॥ (29)

30. एवमेतद्यथा प्राह भवानस्मद्गतं वचः॥ (30)

31. किं करोमि न बध्नाति मम निष्ठुरतां मनः ।
यैः सन्त्यज्य पितृस्नेहं धनलुब्धैर्निराकृतः॥ (31)

32. पतिस्वजनहार्दं च हार्दि तेष्वेव मे मनः ।
किमेतन्नाभिजानामि जानन्नपि महामते॥ (32)

33. यत् प्रेमप्रवणं चित्तं विगुणेष्वपि बन्धुषु ।
तेषां कृते मे निःश्वासो दौर्मनस्यं च जायते॥ (33)

34. करोमि किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरम्॥ (34)

35. मार्कण्डेय उवाच॥ (35)

36. ततस्तौ सहितौ विप्र तं मुनिं समुपस्थितौ॥ (36)

37. समाधिर्नामवैश्योऽसौ स च पार्थिव सत्तमः ।
कृत्वा तु तौ यथान्यायं यथार्हं तेन संविदम्॥ (37)

38. उपविष्टौ कथाः काश्चिच्चक्रतुर्वैश्यपार्थिवौ॥ (38)

39. राजोवाच॥ (39)

40. भगवन्स्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत्॥ (40)

41. दुःखाय यन्मे मनसः स्वचित्तायत्ततां विना ।
ममत्वं गतराज्यस्य राज्याङ्गेष्वखिलेष्वपि॥ (41)

42. जानतोऽपि यथाज्ञस्य किमेतन्मुनिसत्तम ।
अयं च निकृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झितः॥ (42)

43. स्वजनेन च संत्यक्तः तेषु हार्दी तथाप्यति ।
एवमेष तथाहं च द्वावप्यत्यन्तदुःखितौ॥ (43)

44. दृष्टदोषेऽपि विषये ममत्वाकृष्टमानसौ ।
तत् किमेतन्महाभाग यन्मोहो ज्ञानिनोरपि॥ (44)

45. ममास्य च भवत्येषा विवेकान्धस्य मूढता॥ (45)

46. ऋषिरुवाच॥ (46)

47. ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे॥ (47)

48. विषयश्च महाभाग याति चैवं पृथक् पृथक् ।
दिवान्धाः प्राणिनः केचिद् रात्रावन्धास्तथापरे॥ (48)

49. केचिद् दिवा तथा रात्रौ प्राणिनस्तुल्य दृष्टयः ।
ज्ञानिनो मनुजाः सत्यं किं तु ते न हि केवलम्॥ (49)

50. यतो हि ज्ञानिनः सर्वे पशुपक्षिमृगादयः ।
ज्ञानं च तन्मनुष्याणां यत्तेषां मृगपक्षिणाम्॥ (50)

51. मनुष्याणां च यत्तेषां तुल्यमन्यत्तथोभयोः ।
ज्ञानेऽपि सति पश्यैतान् पतङ्गाञ्छावचञ्चुषु॥ (51)

52. कणमोक्षादृतान्मोहात् पीड्यमानानपि क्षुधा ।
मानुषा मनुजव्याघ्र साभिलाषाः सुतान् प्रति॥ (52)

53. लोभात्प्रत्युपकाराय नन्वेतान् किं न पश्यसि ।
तथापि ममतावर्ते मोहगर्ते निपातिताः॥ (53)

54. महामायाप्रभावेण संसारस्थितिकारिणा ।
तन्नात्र विस्मयः कार्यो योगनिद्रा जगत्पतेः॥ (54)

55. महामाया हरेश्चैषा तया सम्मोह्यते जगत् ।
ज्ञानिनामपि चेतांसि देवी भगवती हि सा ॥ (55)

56. बलादाकृष्य मोहाय महामाया प्रयच्छति ।
तया विसृज्यते विश्वं जगदेतच्चराचरम् ॥ (56)

57. सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ।
सा विद्या परमा मुक्तेर्हेतुभूता सनातनी ॥ (57)

58. संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वरी ॥ (58)

59. राजोवाच ॥ (59)

60. भगवन् का हि सा देवी महामायेति यां भवान् ॥ (60)

61. ब्रवीति कथमुत्पन्ना सा कर्मास्याश्च किं द्विज ।
यत्प्रभावा च सा देवी यत्स्वरूपा यदुद्भवा ॥ (61)

62. तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ॥ (62)

63. ऋषिरुवाच ॥ (63)

64. नित्यैव सा जगन्मूर्तिस्तया सर्वमिदं ततम् ॥ (64)

65. तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम ।

देवानां कार्य सिद्ध्यर्थमाविर्भवति सा यदा॥ (65)

66. उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते ।
योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते॥ (66)

67. आस्तीर्य शेषमभजत्कल्पान्ते भगवान् प्रभुः ।
तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ॥ (67)

68. विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माण मुद्यतौ ।
स नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः॥ (68)

69. दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तं च जनार्दनम् ।
तुष्टाव योगनिद्रां तामेकाग्रहृदयस्थितः॥ (69)

70. विबोधनार्थाय हरेर्हरिनेत्रकृतालयाम् ।
विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम्॥ (70)

71. निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः॥ (71)

72. ब्रह्मोवाच॥ (72)

73. त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका॥ (73)

74. सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता ।
अर्धमात्रास्थिता नित्या यानुच्चार्या विशेषतः॥ (74)

75. त्वमेव संध्या सावित्री त्वं देवि जननी परा ।
त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत्॥ (75)

76. त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सर्वदा ।
विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने॥ (76)

77. तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये ।
महाविद्या महामाया महामेधा महास्मृतिः॥ (77)

78. महामोहा च भवती महादेवी महासुरी ।
प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी॥ (78)

79. कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ।
त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा॥ (79)

80. लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च ।
खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा॥ (80)

81. शंखिणी चापिनी बाणभुशुण्डीपरिघायुधा ।
सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुन्दरी॥ (81)

82. परापराणां परमा त्वमेव परमेश्वरी ।
यच्च किञ्चित्क्वचिद्वस्तु सदसद्वाखिलात्मिके ॥ (82)

83. तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा ।
यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् ॥ (83)

84. सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ।
विष्णुः शरीरग्रहणमहमीशान एव च॥ (84)

85. कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत् ।
सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता॥ (85)

86. मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ।
प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु॥ (86)

87. बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ॥ (87)

88. ऋषिरुवाच॥ (88)

89. एवं स्तुता तदा देवी तामसी तत्र वेधसा॥ (89)

90. विष्णोः प्रबोधनार्थाय निहन्तुं मधुकैटभौ ।
नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः॥ (90)

91. निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्त जन्मनः ।
उत्तस्थौ च जगन्नाथः तया मुक्तो जनार्दनः॥ (91)

92. एकार्णवेऽहिशयनात्ततः स ददृशे च तौ ।

मधुकैटभौ दुरात्मानावतिवीर्यपराक्रमौ ॥ (92)

93. क्रोधरक्तेक्षणावत्तुं ब्रह्माणं जनितोद्यमौ ।
समुत्थाय ततस्ताभ्यां युयुधे भगवान् हरिः ॥ (93)

94. पञ्चवर्षसहस्राणि बाहुप्रहरणो विभुः ।
तावप्यतिबलोन्मत्तौ महामायाविमोहितौ ॥ (94)

95. उक्तवंतौ वरोऽस्मत्तो व्रियतामिति केशवम् ॥ (95)

96. श्री भगवानुवाच ॥ (96)

97. भवेतामद्य मे तुष्टौ मम वध्यावुभावपि ॥ (97)

98. किमन्येन वरेणात्र एतावद्धि वृतं मम ॥ (98)

99. ऋषिरुवाच ॥ (99)

100. वञ्चिताभ्या मिति तदा सर्वमापोमयं जगत् ॥ (100)

101. विलोक्य ताभ्यां गदितो भगवान् कमलेक्षणः ।
आवां जहि न यत्रोर्वी सलिलेन परिप्लुता ॥ (101)

102. ऋषिरुवाच ॥ (102)

103. तथेत्युक्त्वा भगवता शङ्खचक्रगदाभृता ।

कृत्वा चक्रेण वै च्छिन्ने जघने शिरसी तयोः ॥ (103)

104. एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयम् ।
प्रभावमस्या देव्यास्तु भूयः शृणु वदामि ते। ऐं ॐ ॥ ||104|

सत्यास्सन्तु यजमानस्य कामाः

ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः
नमः प्रकृत्यै भद्रायै नियताः प्रणतास्मताम् ।

साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
वाग्भव बीजाधिष्ठात्र्यै श्री महाकाल्यै नमः ॥

*****

© Bhaskara Prakasha Ashram



© Bhaskara Prakasha Ashram

# ॥ अथ मध्यम चरित्रम् ॥

## द्वितीयोऽध्यायः

## महिषासुरसैन्य वधः

1. ॐ ह्रीं ऋषिरुवाच॥ (105)

2. देवासुरमभूद् युद्धं पूर्णमब्दशतं पुरा ।
महिषेऽसुराणामधिपे देवानां च पुरन्दरे॥ (106)

3. तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितं ।
जित्वा च सकलान् देवानिन्द्रोऽभून्महिषासुरः॥ (107)

4. ततः पराजिता देवाः पद्मयोनिं प्रजापतिम् ।
पुरस्कृत्य गतास्तत्र यत्रेशगरुडध्वजौ॥ (108)

5. यथावृत्तं तयोस्तद्वन्महिषासुरचेष्टितम् ।
त्रिदशाः कथयामासुर्देवाभिभवविस्तरम्॥ (109)

6. सूर्येंद्राग्न्यनिलेंदूनां यमस्य वरुणस्य च ।
अन्येषां चाधिकारान् स स्वयमेवाधितिष्ठति॥ (110)

7. स्वर्गान्निराकृताः सर्वे तेन देवगणा भुवि ।

विचरन्ति यथा मर्त्या महिषेण दुरात्मना॥ (111)

8. एतद्वः कथितं सर्वममरारिविचेष्टितम् ।
शरणं वः प्रपन्नाः स्मो वधस्तस्य विचिन्त्यताम्॥ (112)

9. इत्थं निशम्य देवानां वचांसि मधुसूदनः ।
चकार कोपं शंभुश्च भ्रुकुटीकुटिलाननौ॥ (113)

10. ततोऽतिकोपपूर्णस्य चक्रिणो वदनात्ततः ।
निश्चक्राम महत्तेजो ब्रह्मणः शङ्करस्य च॥ (114)

11. अन्येषां चैव देवानां शक्रादीनां शरीरतः ।
निर्गतं सुमहत्तेजस्तच्चैक्यं समगच्छत॥ (115)

12. अतीवतेजसः कूटं ज्वलन्तमिव पर्वतम् ।
ददृशुस्ते सुरास्तत्र ज्वालाव्याप्तदिगन्तरम्॥ (116)

13. अतुलं तत्र तत्तेजः सर्वदेवशरीरजम् ।
एकस्थं तदभून्नारी व्याप्तलोकत्रयं त्विषा॥ (117)

14. यदभूच्छाम्भवं तेजः तेनाजायत तन्मुखम् ।
याम्येन चाभवन् केशा बाहवो विष्णुतेजसा॥ (118)

15. सौम्येन स्तनयोर्युग्मं मध्यं चैन्द्रेण चाभवत् ।

वारुणेन च जङ्घोरू नितम्भस्तेजसा भुवः ॥ (119)

16. ब्रह्मणस्तेजसा पादौ तदङ्गुल्योऽर्कतेजसा ।
वसूनां च कराङ्गुल्यः कौबेरेण च नासिका ॥ (120)

17. तस्यास्तु दन्ताः सम्भूताः प्राजापत्येन तेजसा ।
नयनत्रितयं जज्ञे तथा पावकतेजसा ॥ (121)

18. भ्रुवौ च सन्ध्ययोस्तेजः श्रवणावनिलस्य च ।
अन्येषां चैव देवानां सम्भवस्तेजसां शिवा ॥ (122)

19. ततः समस्तदेवानां तेजोराशिसमुद्भवाम् ।
तां विलोक्य मुदं प्रापुरमरा महिषार्दिताः ॥ (123)

20. शूलं शूलाद्विनिष्कृष्य ददौ तस्यै पिनाकधृक् ।
चक्रं च दत्तवान् कृष्णः समुत्पाद्य स्वचक्रतः ॥ (124)

21. शङ्खं च वरुणः शक्तिं ददौ तस्यै हुताशनः ।
मारुतो दत्तवांश्चापं बाणपूर्णे तथेषुधी ॥ (125)

22. वज्रमिन्द्रः समुत्पाद्य कुलिशादमराधिपः ।
ददौ तस्यै सहस्राक्षो घण्टामैरावताद् गजात् ॥ (126)

23. कालदण्डाद्यमो दण्डं पाशं चाम्बुपतिर्ददौ ।

प्रजापतिश्चाक्षमालां ददौ ब्रह्मा कमण्डलुम्॥ (127)

24. समस्तरोमकूपेषु निज रश्मीन् दिवाकरः ।
कालश्च दत्तवान् खड्गं तस्याः चर्म च निर्मलम्॥ (128)

25. क्षीरोदश्चामलं हारमजरे च तथाम्बरे ।
चूडामणिं तथादिव्यं ,कुण्डले कटकानि च॥ (129)

26. अर्धचन्द्रं तथा शुभ्रं केयूरान् सर्वबाहुषु ।
नूपुरौ विमलौ तद्वद् ग्रैवेयक मनुत्तमम्॥ (130)

27. अङ्गुलीयकरत्नानि समस्तास्वङ्गुलीषु च ।
विश्वकर्मा ददौ तस्यै परशुं चातिनिर्मलम्॥ (131)

28. अस्त्राण्यनेकरूपाणि तथाऽभेद्यं च दंशनम् ।
अम्लानपङ्कजां मालां शिरस्युरसि चापराम्॥ (132)

29. अददज्जलधिस्तस्यै पङ्कजं चातिशोभनम् ।
हिमवान् वाहनं सिंहं रत्नानि विविधानिच॥ (133)

30. ददावशून्यं सुरया पानपात्रं धनाधिपः ।
शेषश्च सर्वनागेशो महामणिविभूषितम्॥ (134)

31. नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमाम् ।

अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा॥ (135)

32. सम्मानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः ।
तस्यानादेन घोरेण कृत्स्नमापूरितं नभः॥ (136)

33. अमायतातिमहता प्रतिशब्दो महानभूत् ।
चुक्षुभुः सकला लोकाः समुद्राश्च च कम्पिरे॥ (137)

34. चचाल वसुधा चेलुः सकलाश्च महीधराः ।
जयेति देवाश्च मुदा तामूचुः सिंहवाहिनीम्॥ (138)

35. तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्तयः ।
दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः॥ (139)

36. सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुदाः ।
आः किमेतदिति क्रोधादाभाष्य महिषाऽसुरः॥ (140)

37. अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः ।
स ददर्श ततो देवीं व्याप्तलोकत्रयां त्विषा॥ (141)

38. पादाक्रान्त्या नतभुवं किरीटोल्लिखिताम्बराम् ।
क्षोभिताशेष पातालां धनुर्ज्यानिःस्वनेन ताम्॥ (142)

39. दिशो भुजसहस्रेण समन्ताद् व्याप्य संस्थिताम् ।

ततः प्रववृते युद्धं तया देव्या सुरद्विषां॥ (143)

40. शस्त्रास्त्रैर्बहुधा मुक्तैरादीपितदिगन्तरम् ।
महिषासुरसेनानीः चिक्षुराख्यो महासुरः॥ (144)

41. युयुधे चामरश्चान्यैश्चतुरङ्ग बलान्वितः ।
रथानामयुतैः षड्भिरुदग्राख्यो महाऽसुरः॥ (145)

42. अयुध्यतायुतानां च सहस्रेणमहाहनुः ।
पञ्चाशद्भिश्च नियुतैरसिलोमा महाऽसुरः॥ (146)

43. अयुतानां शतैः षड्भिर्बाष्कलो युयुधेरणे ।
गजवाजिसहस्रौघैरनेकैः परिवारितः॥ (147)

44. वृतो रथानां कोट्या च युद्धे तस्मिन्नयुध्यत ।
बिडालाख्योऽयुतानां च पञ्चाशद्भिरथायुतैः॥ (148)

45. युयुधे संयुगे तत्र रथानां परिवारितः ।
अन्ये च तत्रायुतशो रथनागहयैर्वृताः॥ (149)

46. युयुधुः संयुगे देव्या सह तत्र महाऽसुराः ।
कोटिकोटिसहस्रैस्तु रथानां दन्तिनां तथा॥ (150)

47. हयानां च वृतो युद्धे तत्राभून्महिषाऽसुरः ।

तोमरैर्भिन्दिपालैश्च शक्तिभिर्मुसलैस्तथा॥ (151)

48. युयुधुः संयुगे देव्या खड्गैः परशुपट्टिशैः ।
केचिच्च चिक्षिपुः शक्तीः केचित् पाशांस्तथाऽपरे॥ (152)

49. देवीं खड्गप्रहारैस्तु ते तां हन्तुं प्रचक्रमुः ।
साऽपि देवी ततस्तानि शस्त्राण्यस्त्राणि चण्डिका॥ (153)

50. लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षिणी ।
अनायस्तानना देवी स्तूयमाना सुरर्षिभिः॥ (154)

51. मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी ।
सोऽपि क्रुद्धो धुतसटो देव्या वाहनकेसरी॥ (155)

52. चचारासुरसैन्येषु वनेष्विव हुताशनः ।
निःश्वासान् मुमुचे यांश्च युध्यमाना रणेऽम्बिका॥ (156)

53. त एव सद्यः सम्भूता गणाः शतसहस्रशः ।
युयुधुस्ते परशुभिर्भिन्दिपालासिपट्टिशैः॥ (157)

54. नाशयन्तोऽसुरगणान् देवीशक्त्युप बृंहिताः ।
अवादयंत पटहान् गणाः शंङ्खांस्तथाऽपरे॥ (158)

55. मृदङ्गांश्च तथैवान्ये तस्मिन् युद्धमहोत्सवे ।

ततो देवी त्रिशूलेन गदया शक्तिवृष्टिभिः ॥ (159)

56. खड्गादिभिश्च शतशो निजघान महाऽसुरान् ।
पातयामास चैवान्यान् घण्टास्वनविमोहितान् ॥ (160)

57. असुरान् भुवि पाशेन बद्ध्वा चान्यानकर्षयत् ।
केचिद् द्विधा कृतास्तीक्ष्णैः खड्गपातैस्तथाऽपरे ॥ (161)

58. विपोथिता निपातेन गदया भुवि शेरते ।
वेमुश्च केचिद्रुधिरं मुसलेन भृशं हताः ॥ (162)

59. केचिन्निपतिता भूमौ भिन्नाः शूलेन वक्षसि ।
निरन्तराः शरौघेण कृताः केचिद्रणाजिरे ॥ (163)

60. श्येनानुकारिणः प्राणान् मुमुचुस्त्रिदशार्दनाः ।
केषांचिद् बाहवश्छिन्नाश्छिन्नग्रीवास्तथाऽपरे ॥ (164)

61. शिरांसि पेतुरन्येषामन्ये मध्ये विदारिताः ।
विच्छिन्नजङ्घास्त्वपरे पेतुरुर्व्यां महाऽसुराः ॥ (165)

62. एकबाह्वक्षिचरणाः केचिद्देव्या द्विधा कृताः ।
छिन्नेऽपि चान्ये शिरसि पतिताः पुनरुत्थिताः ॥ (166)

63. कबन्धा युयुधुर्देव्या गृहीतपरमायुधाः ।

ननृतुश्चापरे तत्र युद्धे तूर्यलयाश्रिताः॥ (167)

64. कबन्धाश्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः ।
तिष्ठ तिष्ठेति भाषन्तो देवीमन्ये महाऽसुराः॥ (168)

65. पातितै रथनागाश्वैरसुरैश्च वसुंधरा ।
अगम्या साऽभवत्तत्र यत्राभूत्स महारणः॥ (169)

66. शोणितौघा महानद्यः सद्यस्तत्र प्रसुस्रुवुः ।
मध्ये चासुरसैन्यस्य वारणासुरवाजिनाम्॥ (170)

67. क्षणेन तन्महासैन्यमसुराणां तथाऽम्बिका ।
निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयम्॥ (171)

68. स च सिंहो महानादमुत्सृजन्धुतकेसरः ।
शरीरेभ्योऽमरारीणामसूनिव विचिन्वति॥ (172)

69. देव्या गणैश्च तैस्तत्र कृतं युद्धं महाऽसुरैः ।
यथैषां तुतुषुर्देवाः पुष्पवृष्टिमुचो दिवि ॥ ॐ॥ (173)

सत्यास्सन्तु यजमानस्य कामाः

ओं नमो देव्यै महादेव्यै शिवायै सततं नमः

नमः प्रकृत्यै भद्रायै नियताः प्रणतास्मताम् ।

साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
**लक्ष्मीबीजाधिष्ठात्र्यै श्री महालक्ष्म्यै** नमः ॥

*****

## ॥ तृतीयोऽध्यायः ॥

## महिषासुरवधः

1. ओं ऋषिरुवाच॥ (174)

2. निहन्यमानं तत्सैन्यमवलोक्य महासुरः ।
सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथाम्बिकाम्॥ (175)

3. स देवीं शरवर्षेण ववर्ष समरेऽसुरः ।
यथा मेरुगिरेः शृङ्गं तोयवर्षेण तोयदः॥ (176)

4. तस्य च्छित्त्वा ततो देवी लीलयैव शरोत्करान् ।
जघान तुरगान् बाणैर्यन्तारं चैव वाजिनाम्॥ (177)

5. चिच्छेद च धनुः सद्यो ध्वजं चातिसमुच्छ्रितम् ।
विव्याध चैव गात्रेषु छिन्नधन्वानमाशुगैः॥ (178)

6. सच्छिन्नधन्वा विरथो हताश्वो हतसारथिः ।
अभ्यधावत तां देवीं खड्गचर्म धरोऽसुरः॥ (179)

7. सिंहमाहत्य खड्गेन तीक्ष्णधारेण मूर्धनि ।
आजघान भुजे सव्ये देवीमप्यतिवेगवान्॥ (180)

8. तस्याः खड्गो भुजं प्राप्य पफाल नृपनन्दन ।
ततो जग्राह शूलं स कोपादरुणलोचनः ॥ (181)

9. चिक्षेप च ततस्तत्तु भद्रकाल्यां महाऽसुरः ।
जाज्वल्यमानं तेजोभी रविबिम्बमिवाम्बरात् ॥ (182)

10. दृष्ट्वा तदापतच्छूलं देवी शूलममुञ्चत ।
तच्छूलं शतधा तेन नीतं स च महाऽसुरः ॥ (183)

11. हते तस्मिन् महावीर्ये महिषस्य चमूपतौ ।
आजगाम गजारूढश्चामरस्त्रिदशार्दनः ॥ (184)

12. सोऽपि शक्तिं मुमोचाथ देव्यास्तामम्बिका द्रुतम् ।
हुङ्काराभिहतां भूमौ पातयामासनिष्प्रभाम् ॥ (185)

13. भग्नां शक्तिं निपतितां दृष्ट्वा क्रोधसमन्वितः ।
चिक्षेप चामरः शूलं बाणैस्तदपि साच्छिनत् ॥ (186)

14. ततः सिंहः समुत्पत्य गजकुम्भान्तरे स्थितः ।
बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा ॥ (187)

15. युध्यमानौ ततस्तौ तु तस्मान् नागान् महीं गतौ ।
युयुधातेऽतिसंरब्धौ प्रहारैरतिदारुणैः ॥ (188)

16. ततो वेगात् खमुत्पत्य निपत्य च मृगारिणा ।
करप्रहारेण शिरश्चामरस्य पृथक् कृतम्॥ (189)

17. उदग्रश्च रणे देव्या शिलावृक्षादिभिर्हतः ।
दन्तमुष्टितलैश्चैव करालश्च निपातितः॥ (190)

18. देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतम् ।
वाष्कलं भिन्दिपालेन बाणैस्ताम्रं तथाऽन्धकम्॥ (191)

19. उग्रास्यमुग्रवीर्यं च तथैव च महाहनुम् ।
त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी॥ (192)

20. बिडालस्यासिना कायात् पातयामास वै शिरः ।
दुर्धरं दुर्मुखं चोभौ शरैर् निन्ये यमक्षयम्॥ (193)

21. एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः ।
माहिषेण स्वरूपेण त्रासयामास तान् गणान्॥ (194)

22. कांश्चित्तुण्डप्रहारेण खुरक्षेपैस्तथाऽपरान् ।
लाङ्गूल ताडितां श्चान्यान्श‍ृङ्गाभ्यां च विदारितान्॥ (195)

23. वेगेन कांश्चिदपरान् नादेन भ्रमणेन च ।
निःश्वासपवनेनान्यान् पातया मास भूतले॥ (196)

24. निपात्य प्रमथानीकमभ्यधावत सोऽसुरः ।
सिंहं हन्तुं महादेव्याः कोपं चक्रे ततोऽम्बिका ॥ (197)

25. सोऽपि कोपान्महावीर्यः खुरक्षुण्ण महीतलः ।
शृङ्गाभ्यां पर्वतानुच्चांश्चिक्षेप च ननाद च ॥ (198)

26. वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्यत ।
लाङ्गूलेनाहतश्चाब्धिः प्लावयामास सर्वतः ॥ (199)

27. धुतशृङ्गविभिन्नाश्च खण्डं खण्डं ययुर्घनाः ।
श्वासानिलास्ताः शतशो निपेतुर्नभसोऽचलाः ॥ (200)

28. इति क्रोधसमाध्मात मापतंतं महाऽसुरम् ।
दृष्ट्वा सा चण्डिका कोपं तद्वधाय तदाऽकरोत् ॥ (201)

29. सा क्षिप्त्वा तस्य वै पाशं तं बबन्ध महाऽसुरम् ।
तत्याज माहिषं रूपं सोऽपि बद्धो महामृधे ॥ (202)

30. ततः सिंहोऽभवत् सद्यो यावत्तस्याम्बिका शिरः ।
छिनत्ति तावत्पुरुषः खङ्गपाणिरधृश्यत ॥ (203)

31. तत एवाशु पुरुषं देवी चिच्छेद सायकैः ।
तं खङ्गचर्मणा सार्धं ततः सोऽभून्महागजः ॥ (204)

32. करेण च महासिंहं तं चकर्ष जगर्ज च ।
कर्षतस्तु करं देवी खङ्गेन निरकृंतत॥ (205)

33. ततो महाऽसुरो भूयो माहिषं वपुरास्थितः ।
तथैव क्षोभयामास त्रैलोक्यं सचराचरम्॥ (206)

34. ततः क्रुद्धा जगन्माता चण्डिका पानमुत्तमम् ।
पपौ पुनः पुनश्चैव जहासारुणलोचना॥ (207)

35. ननर्द चासुरः सोऽपि बलवीर्यमदोद्धतः ।
विषाणाभ्यां च चिक्षेप चण्डिकां प्रति भूधरान्॥ (208)

36. सा च तान् प्रहितांस्तेन चूर्णयन्ती शरोत्करैः ।
उवाच तं मदोद्धूतमुखरागाकुलाक्षरम्॥ (209)

37. देव्युवाच॥ (210)

38. गर्ज गर्ज क्षणं मूढ मधु यावत् पिबाम्यहम् ।
मया त्वयि हतेऽत्रैव गर्जिष्यंत्याशु देवताः॥ (211)

39. ऋषिरुवाच॥ (212)

40. एवमुक्त्वा समुत्पत्य साऽऽरूढा तं महाऽसुरम् ।
पादेनाक्रम्य कण्ठे च शूलेनैन मताडयत्॥ (213)

41. ततः सोऽपि पदाक्रान्तस्तया निजमुखात्ततः ।
अर्धनिष्क्रान्त एवासीद् देव्या वीर्येण संवृतः ॥ (214)

42. अर्धनिष्क्रान्त एवासौ युध्यमानो महाऽसुरः ।
तया महाऽसिना देव्या शिरश्छित्त्वा निपातितः ॥ (215)

43. ततो हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत् ।
प्रहर्षं च परं जग्मुः सकला देवतागणाः ॥ (216)

44. तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्महर्षिभिः ।
जगुर्गन्धर्व पतयो ननृतुश्चाप्सरोगणाः ॥ ॐ ॥ (217)

सत्यास्सन्तु यजमानस्य कामाः

ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः
नमः प्रकृत्यै भद्रायै नियताः प्रणतास्मताम् ।

साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
**अष्टाविंशति वर्णात्मिकायै श्री महालक्ष्म्यै** नमः ॥

*****

## ॥ चतुर्थोऽध्यायः ॥

## शक्रादिस्तुतिः

1. ॐ ऋषिरुवाच॥ (218)

2. शक्रादयः सुरगणा निहतेऽतिवीर्ये,

तस्मिन् दुरात्मनि सुरारिबले च देव्या ।

तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा

वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः॥ (219)

3. देव्या यया ततमिदं जगदात्मशक्त्या,

निश्शेषदेवगणशक्तिसमूहमूर्त्या ।

तामम्बिकामखिलदेवमहर्षिपूज्याम्,

भक्त्या नताः स्म विदधातु शुभानि सा नः॥ (220)

4. यस्याः प्रभाव मतुलं भगवाननंतो,

ब्रह्मा हरश्च न हि वक्तुमलं बलं च ।

सा चण्डिकाऽखिलजगत्परिपालनाय,

नाशाय चाशुभभयस्य मतिं करोतु॥ (221)

5. या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः

पापात्मनां कृतधियां हृदयेषु बुद्धिः
श्रद्धा सतां कुलजनप्रभवस्य लज्जा,
तां त्वां नताः स्म परिपालय देवि विश्वम्॥ (222)

6. किं वर्णयाम तव रूपमचिन्त्यमेतत्,
किं चातिवीर्यमसुर क्षयकारि भूरि ।
किं चाहवेषु चरितानि तवाद्भुतानि,
सर्वेषु देव्यसुरदेवगणादिकेषु॥ (223)

7. हेतुः समस्तजगतां त्रिगुणाऽपि दोषै
र्न ज्ञायसे हरिहरादिभिरप्यपारा ।
सर्वाश्रयाखिलमिदं जगदंशभूत,
मव्याकृता हि परमा प्रकृतिस्त्वमाद्या॥ (224)

8. यस्याः समस्तसुरता समुदीरणेन,
तृप्तिं प्रयाति सकलेषु मखेषु देवि!
स्वाहाऽसि वै पितृगणस्य च तृप्तिहेतु,
रुच्चार्यसे त्वमत एव जनैः स्वधा च॥ (225)

9. या मुक्तिहेतुरविचिन्त्यमहाव्रता त्व,
मभ्यस्यसे सुनियतेन्द्रियतत्वसारैः ।

मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषै

विद्याऽसि सा भगवती परमा हि देवि॥ (226)

10. शब्दात्मिका सुविमलर्ग्यजुषां निधान,

मुद्गीथरम्य पदपाठवतां च साम्नाम् ।

देवी त्रयी भगवती भवभावनाय,

वार्ता च सर्वजगतां परमार्तिहन्त्री॥ (227)

11. मेधाऽसि देवि विदिताऽखिलशास्त्रसारा,

दुर्गाऽसि दुर्गभवसागरनौरसङ्गा ।

श्रीः कैटभारिहृदयैककृताधिवासा,

गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा॥ (228)

12. ईषत्सहासममलं परिपूर्णचन्द्र

बिम्बानुकारि कनकोत्तमकान्तिकान्तम् ।

अत्यद्भुतं प्रहृतमात्तरुषा तथापि

वक्त्रं विलोक्य सहसा महिषासुरेण॥ (229)

13. दृष्ट्वा तु देवि कुपितं भ्रुकुटीकराल

मुद्यच्छशाङ्कसदृशच्छवि यन्न सद्यः ।

प्राणान् मुमोच महिषस्तदतीव चित्रं,

कैर्जीव्यते हि कुपितान्तकदर्शनेन॥ (230)

14. देवि प्रसीद परमा भवती भवाय,

सद्यो विनाशयसि कोपवती कुलानि ।

विज्ञातमेतदधुनैव यदस्तमेत

न्नीतं बलं सुविपुलं महिषासुरस्य॥ (231)

15. ते सम्मता जनपदेषु धनानि तेषां,

तेषां यशांसि न च सीदति धर्मवर्गः ।

धन्यास्त एव निभृतात्मजभृत्यदारा,

येषां सदाऽभ्युदयदा भवती प्रसन्ना॥ (232)

16. धर्म्याणि देवि सकलानि सदैव कर्मा

ण्यत्यादृतः प्रतिदिनं सुकृती करोति ।

स्वर्गं प्रयाति च ततो भवतीप्रसादा,

ल्लोकत्रयेऽपि फलदा ननु देवि तेन॥ (233)

17. दुर्गे स्मृता हरसि भीतिमशेषजन्तोः,

स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।

दारिद्र्यदुःखभय हारिणि का त्वदन्या,

सर्वोपकारकरणाय सदाऽऽर्द्रचित्ता॥ (234)

18. एभिर्हतैर्जगदुपैति सुखं तथैते
कुर्वन्तु नाम नरकाय चिराय पापम् ।
सङ्ग्राममृत्युमधिगम्य दिवं प्रयान्तु,
मत्वेति नूनमहितान् विनिहंसि देवि ॥ (235)

19. दृष्ट्वैव किं न भवती प्रकरोति भस्म,
सर्वासुरानरिषु यत् प्रहिणोषि शस्त्रम् ।
लोकान् प्रयान्तु रिपवोऽपि हि शस्त्रपूता,
इत्थं मतिर्भवति तेष्वपि तेऽतिसाध्वी ॥ (236)

20. खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः
शूलाग्रकान्तिनिवहेन दृशोऽसुराणाम् ।
यन्नागता विलयमंशुमदिन्दुखण्ड
योग्याननं तव विलोकयतां तदेतत् ॥ (237)

21. दुर्वृत्तवृत्तशमनं तव देवि शीलं,
रूपं तथैतदविचिन्त्यमतुल्यमन्यैः ।
वीर्यं च हन्तृ हृतदेवपराक्रमाणां,
वैरिष्वपि प्रकटितैव दया त्वयेत्थम् ॥ (238)

22. केनोपमा भवतु तेऽस्य पराक्रमस्य,

रूपं च शतृभयकार्यतिहारि कुत्र ।
चित्ते कृपा समरनिष्ठुरता च दृष्टा,
त्वय्येव देवि वरदे भुवनत्रयेऽपि॥ (239)

23. त्रैलोक्यमेतदखिलं रिपुनाशनेन,
त्रातं त्वया समरमूर्धनि तेऽपि हत्वा ।
नीता दिवं रिपुगणा भयमप्यपास्त,
मस्माकमुन्मदसुरारिभवं नमस्ते॥ (240)

24. शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च॥ (241)

25. प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥ (242)

26. सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ।
यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवम्॥ (243)

27. खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ।
करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः॥ (244)

28. ऋषिरुवाच॥ (245)

29. एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः ।
अर्चिता जगतां धात्री तथा गन्धानुलेपनैः ॥ (246)

30. भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैस्तु धूपिता ।
प्राह प्रसादसुमुखी समस्तान् प्रणतान् सुरान् ॥ (247)

31. देव्युवाच ॥ (248)

32. व्रियतां त्रिदशाः सर्वे यदस्मत्तोऽभिवाञ्छितम् ॥ (249)

33. देवा ऊचुः ॥ (250)

34. भगवत्या कृतं सर्वं न किञ्चिदवशिष्यते ॥ (251)

35. यदयं निहतः शत्रुरस्माकं महिषासुरः ।
यदि चापि वरो देयस्त्वयाऽस्माकं महेश्वरि ॥ (252)

36. संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः ।
यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने ॥ (253)

37. तस्य वित्तर्धिविभवैर्धनदारादिसम्पदाम् ।
वृद्धयेऽस्मत् प्रसन्ना त्वं भवेथाः सर्वदाऽम्बिके ॥ (254)

38. ऋषिरुवाच ॥ (255)

39. इति प्रसादिता देवैः जगतोऽर्थे तथाऽऽत्मनः ।
तथेत्युक्त्वा भद्रकाली बभूवान्तर्हिता नृप ॥ (256)

40. इत्येतत् कथितं भूप सम्भूता सा यथापुरा ।
देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी॥ (257)

41. पुनश्च गौरीदेहात्सा समुद्भूता यथाऽभवत् ।
वधाय दुष्टदैत्यानां तथा शुम्भनिशुम्भयोः॥ (258)

42. रक्षणाय च लोकानां देवानामुपकारिणी ।
तच्छृणुष्वमयाऽऽख्यातं यथावत् कथयामिते।ह्रीं ॥ ॐ॥ (259)

सत्यास्सन्तु यजमानस्य कामाः

ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः
नमः प्रकृत्यै भद्रायै नियताः प्रणतास्मताम् ।

साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
त्रिवर्णात्मिकायै शक्तिलक्ष्म्यै नमः॥

*****

©Bhaskara Prakasha Ashram



©Bhaskara Prakasha Ashram

## ॥ उत्तमचरित्रम् ॥

## पञ्चमोऽध्यायः

## देव्या दूत संवादः

1. ॐ क्लीं ऋषिरुवाच॥ (260)

2. पुरा शुम्भनिशुम्भाभ्यामसुराभ्यां शचीपतेः ।
त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात्॥ (261)

3. तावेव सूर्यतां तद्वदधिकारं तथैन्दवम् ।
कौबेरमथ याम्यं च चक्राते वरुणस्य च॥ (262)

4. तावेव पवनर्धिं च चक्रतुर्वह्निकर्म च ।
ततो देवा विनिर्धूता भ्रष्टराज्याः पराजिताः॥ (263)

5. हृताधिकारास्त्रिदशास्ताभ्यां सर्वे निराकृताः ।
महाऽसुराभ्यां तां देवीं संस्मरन्त्यपराजितां॥ (264)

6. तयाऽस्माकं वरो दत्तो यथाऽऽपत्सु स्मृताऽखिलाः ।
भवतां नाशयिष्यामि तत्क्षणात् परमापदः॥ (265)

7. इति कृत्वा मतिं देवा हिमवन्तं नगेश्वरं ।
जग्मुस्तत्र ततो देवीं विष्णुमायां प्रतुष्टुवुः॥ (266)

8. देवा ऊचुः ॥ (267)

9. नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥ (268)

10. रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ।
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः ॥ (269)

11. कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुर्मो नमो नमः ।
नैर्ऋत्यै भूभृतां लक्ष्मै शर्वाण्यै ते नमो नमः ॥ (270)

12. दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ।
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥ (271)

13. अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः ।
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥ (272)

1416. यादेवी सर्वभूतेषु विष्णुमायेति शब्दिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः (273,274,275)

1719. यादेवी सर्वभूतेषु चेतनेत्यभिधीयते ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः (276,277,278)

2022. यादेवी सर्वभूतेषु बुद्धिरूपेण संस्थिता
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः (279,280,281)

2325. यादेवी सर्वभूतेषु निद्रारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः (282,283,284)

2628. यादेवी सर्वभूतेषु क्षुधारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः (285,286,287)

2931. यादेवी सर्वभूतेषु छायारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः (288,289,290)

3234. यादेवी सर्वभूतेषु शक्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः (291,292,293)

3537. यादेवी सर्वभूतेषु तृष्णारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः (294,295,296)

3840. यादेवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः (297,298,299)

4143. यादेवी सर्वभूतेषु जातिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः (300,301,302)

4446. यादेवी सर्वभूतेषु लज्जारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः (303,304,305)

4749. यादेवी सर्वभूतेषु शान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः (306,307,308)

5052. यादेवी सर्वभूतेषु श्रद्धारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः (309,310,311)

5355. यादेवी सर्वभूतेषु कान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः (312,313,314)

5658. यादेवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः (315,316,317)

5961. यादेवी सर्वभूतेषु वृत्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः (318,319,320)

6264. यादेवी सर्वभूतेषु स्मृतिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः (321,322,323)

6567. यादेवी सर्वभूतेषु दयारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः (324,325,326)

6870. यादेवी सर्वभूतेषु तुष्टिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः (327,328,329)

7173. यादेवी सर्वभूतेषु मातृरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः (330,331,332)

7476. यादेवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः (333,334,335)

77. इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या ।
भूतेषु सततं तस्यै व्याप्तिदेव्यै नमो नमः ॥ (336)

7880. चितिरूपेण या कृत्स्नमेतद् व्याप्य स्थिता जगत् ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः (337,338,339)

81. स्तुता सुरैः पूर्वमभीष्टसंश्रयात्
तथा सुरेन्द्रेण दिनेषु सेविता ।
करोतु सा नः शुभहेतुरीश्वरी
शुभानि भद्राण्यभिहन्तु चापदः ॥ (340)

82. या साम्प्रतं चोद्धतदैत्यतापितै
रस्माभिरीशा च सुरैर्नमस्यते ।
या च स्मृता तत्क्षणमेव हन्ति नः

सर्वापदो भक्तिविनम्रमूर्तिभिः ॥ (341)

83. ऋषिरुवाच ॥ (342)

84. एवं स्तवादियुक्तानां देवानां तत्र पार्वती ।
स्नातुमभ्याययौ तोये जाह्नव्या नृपनन्दन ॥ (343)

85. साऽब्रवीत्तान् सुरान् सुभ्रूर्भवद्भिः स्तूयतेऽत्र का ।
शरीर कोशतश्चास्याः समुद्भूताऽब्रवीच्छिवा ॥ (344)

86. स्तोत्रं ममैतत् क्रियते शुम्भदैत्यनिराकृतैः ।
देवैः समेतैः समरे निशुम्भेन पराजितैः ॥ (345)

87. शरीरकोशाद्यत् तस्याः पार्वत्यानिःसृताम्बिका ।
कौशिकीति समस्तेषु ततो लोकेषु गीयते ॥ (346)

88. तस्यां विनिर्गतायां तु कृष्णाऽभूत् साऽपि पार्वती ।
कालिकेति समाख्याता हिमाचलकृताश्रया ॥ (347)

89. ततोऽम्बिकां परं रूपं बिभ्राणां सुमनोहरं ।
ददर्श चण्डो मुण्डश्च भृत्यौ शुम्भनिशुम्भयोः ॥ (348)

90. ताभ्यां शुम्भाय चाख्याता सातीव सुमनोहरा ।
काप्याऽस्ते स्त्री महाराज भासयन्ती हिमाचलम् ॥ (349)

91. नैव तादृक् क्वचिद् रूपं दृष्टं केनचिदुत्तमम् ।
ज्ञायतां काऽप्यसौ देवी गृह्यतां चासुरेश्वर ॥ (350)

92. स्त्रीरत्नमतिचार्वङ्गी द्योतयन्ती दिशस्त्विषा ।
सा तु तिष्ठति दैत्येन्द्र तां भवान् द्रष्टुमर्हति ॥ (351)

93. यानि रत्नानि मणयो गजाश्वादीनि वै प्रभो
त्रैलोक्ये तु समस्तानि साम्प्रतं भान्ति ते गृहे ॥ (352)

94. ऐरावतः समानीतो गजरत्नं पुरन्दरात् ।
पारिजाततरुश्चायं तथैवोच्चैःश्रवा हयः ॥ (353)

95. विमानं हंससंयुक्तमेतत् तिष्ठति तेऽङ्गणे ।
रत्नभूत मिहानीतं यदासीद्वेधसोऽद्भुतं ॥ (354)

96. निधिरेष महापद्मः समानीतो धनेश्वरात् ।
किञ्जल्किनीं ददौ चाब्धिर्मालामम्लानपङ्कजां ॥ (355)

97. छत्रं ते वारुणं गेहे काञ्चनस्रावि तिष्ठति ।
तथाऽयं स्यन्दनवरो यः पुराऽऽसीत् प्रजापतेः ॥ (356)

98. मृत्योरुत्क्रान्तिदा नाम शक्तिरीश त्वया हृता ।
पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे ॥ (357)

99. निशुम्भस्याब्दिजाताश्च समस्ता रत्नजातयः ।
वह्निरपि ददौ तुभ्यमग्निशौचे च वाससी॥ (358)

100. एवं दैत्येन्द्र रत्नानि समस्तान्याहृतानि ते ।
स्त्री रत्नमेषा कल्याणी त्वया कस्मान्न गृह्यते॥ (359)

101. ऋषिरुवाच॥ (360)

102. निशम्येति वचः शुम्भः स तदा चण्डमुण्डयोः ।
प्रेषयामास सुग्रीवं दूतं देव्या महाऽसुरम्॥ (361)

103. इति चेति च वक्तव्या सा गत्वा वचनान्मम ।
यथा चाभ्येति सम्प्रीत्या तथा कार्यं त्वया लघु॥ (362)

104. स तत्र गत्वा यत्रास्ते शैलोद्देशेऽतिशोभने ।
सा देवी तां ततः प्राह श्लक्ष्णं मधुरया गिरा॥ (363)

105. दूत उवाच॥ (364)

106. देवि दैत्येश्वरः शुम्भस्त्रैलोक्ये परमेश्वरः ।
दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः॥ (365)

107. अव्याहताज्ञः सर्वासु यः सदा देवयोनिषु ।
निर्जिताखिलदैत्यारिः स यदाह शृणुष्व तत्॥ (366)

108. मम त्रैलोक्यमखिलं मम देवा वशानुगाः ।
यज्ञभागानहं सर्वानुपाश्नामि पृथक् पृथक्॥ (367)

109. त्रैलोक्ये वररत्नानि मम वश्यान्यशेषतः ।
तथैव गजरत्नं च हृत्वा देवेन्द्रवाहनं॥ (368)

110. क्षीरोदमथनोद्भूतमश्वरत्नं ममामरैः ।
उच्चैःश्रवससंज्ञं तत्प्रणिपत्य समर्पितं॥ (369)

111. यानि चान्यानि देवेषु गन्धर्वेषूरगेषु च ।
रत्नभूतानि भूतानि तानि मय्येव शोभने॥ (370)

112. स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयम् ।
सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयम्॥ (371)

113. मां वा ममानुजं वापि निशुम्भमुरुविक्रमम् ।
भज त्वं चञ्चलापाङ्गि रत्नभूताऽसि वै यतः॥ (372)

114. परमैश्वर्यमतुलं प्राप्स्यसे मत्परिग्रहात् ।
एतद्बुध्या समालोच्य मत्परिग्रहतां व्रज॥ (373)

115. ऋषिरुवाच॥ (374)

116. इत्युक्ता सा तदा देवी गम्भीरान्तःस्मिता जगौ ।

दुर्गा भगवती भद्रा ययेदं धार्यते जगत्॥ (375)

117. देव्युवाच॥ (376)

118. सत्यमुक्तं त्वया नात्र मिथ्या किञ्चित् त्वयोदितम् ।
त्रैलोक्याधिपतिः शुम्भो निशुम्भश्चापि तादृशः॥ (377)

119. किं त्वत्र यत् प्रतिज्ञातं मिथ्या तत् क्रियते कथम् ।
श्रूयतामल्पबुद्धित्वात्प्रतिज्ञा या कृता पुरा॥ (378)

120. यो मां जयति सङ्ग्रामे यो मे दर्पं व्यपोहति ।
यो मे प्रतिबलो लोके स मे भर्ता भविष्यति॥ (379)

121. तदाऽऽगच्छतु शुम्भोऽत्र निशुम्भो वा महाऽसुरः ।
माम् जित्वा किं चिरेणात्र पाणिं गृह्णातु मे लघु॥ (380)

122. दूत उवाच॥ (381)

123. अवलिप्तासि मैवं त्वं देवि ब्रूहि ममाग्रतः ।
त्रैलोक्ये कः पुमांस्तिष्ठेदग्रे शुम्भनिशुम्भयोः॥ (382)

124. अन्येषामपि दैत्यानां सर्वे देवा न वै युधि ।
तिष्ठन्ति सम्मुखे देवि किं पुनः स्त्री त्वमेकिका॥ (383)

125. इन्द्राद्याः सकला देवास्तस्थुर्येषां न संयुगे ।

शुम्भादीनां कथं तेषां स्त्री प्रयास्यसि सम्मुखम्॥ (384)

126. सा त्वं गच्छ मयैवोक्ता पार्श्वं शुम्भनिशुम्भयोः ।
केशाकर्षणनिर्धूतगौरवा मा गमिष्यसि॥ (385)

127. देव्युवाच॥ (386)

128. एवमेतद् बली शुम्भो निशुम्भश्चातिवीर्यवान् ।
किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा॥ (387)

129. स त्वं गच्छ मयोक्तं ते यदेतत् सर्वमादृतः ।
तदाचक्ष्वासुरेन्द्राय स च युक्तं करोतु तत्॥ ॐ ॥ (388)

सत्यास्सन्तु यजमानस्य कामाः

ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः
नमः प्रकृत्यै भद्रायै नियताः प्रणतास्मताम् ।

साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
विष्णुमायादि त्रयो विंशति देवतायै नमः॥

*****

## ॥ षष्ठोऽध्यायः ॥

## धूम्रलोचन वधः

1. ॐ ऋषिरुवाच॥ (389)

2. इत्याकर्ण्य वचो देव्याः स दूतोऽमर्षपूरितः ।
समाचष्ट समागम्य दैत्यराजाय विस्तरात्॥ (390)

3. तस्य दूतस्य तद्वाक्यमाकर्ण्याऽसुरराट् ततः ।
सक्रोधः प्राह दैत्यानामधिपं धूम्रलोचनम्॥ (391)

4. हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः ।
तामानय बलाद्दुष्टां केशाकर्षणविह्वलाम्॥ (392)

5. तत्परित्राणदः कश्चिद्यदि वोत्तिष्ठतेऽपरः ।
स हन्तव्योऽमरो वापि यक्षो गन्धर्व एव वा॥ (393)

6. ऋषिरुवाच॥ (394)

7. तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो धूम्रलोचनः ।
वृतः षष्ट्या सहस्राणामसुराणां द्रुतं ययौ॥ (395)

8. स दृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थिताम् ।

जगादोच्चैः प्रयाहीति मूलं शुम्भनिशुम्भयोः॥ (396)

9. न चेत्प्रीत्याऽद्य भवति मद्भर्तारमुपैष्यति ।
ततो बलान्नयाम्येष केशाकर्षणविह्वलाम्॥ (397)

10. देव्युवाच॥ (398)

11. दैत्येश्वरेण प्रहितो बलवान् बलसंवृतः ।
बलान्नयसि मामेवं ततः किं ते करोम्यहम्॥ (399)

12. ऋषिरुवाच॥ (400)

13. इत्युक्तः सोऽभ्यधावत्तामसुरो धूम्रलोचनः ।
हुङ्कारेणैव तं भस्मसाच्चकाराम्बिका ततः॥ (401)

14. अथ क्रुद्धं महा सैन्यमसुराणां तथाऽम्बिका ।
ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः॥ (402)

15. ततो धुतसटः कोपात्कृत्वा नादं सुभैरवम् ।
पपाताऽसुरसेनायां सिंहो देव्याः स्ववाहनः॥ (403)

16. कांश्चित् करप्रहारेण दैत्यानास्येन चापरान् ।
आक्रम्य चाधरेणान्यान् स जघान महाऽसुरान्॥ (404)

17. केषाञ्चित् पाटयामास नखैः कोष्ठानि केसरी ।

तथा तलप्रहारेण शिरांसि कृतवान् पृथक्॥ (405)

18. विच्छिन्नबाहुशिरसः कृतास्तेन तथाऽपरे ।
पपौ च रुधिरं कोष्ठादन्येषां धुतकेसरः॥ (406)

19. क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना ।
तेन केसरिणा देव्या वाहनेनातिकोपिना॥ (407)

20. श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनम् ।
बलं च क्षयितं कृत्स्नं देवी केसरिणा ततः॥ (408)

21. चुकोप दैत्याधिपतिः शुम्भः प्रस्फुरिता धरः ।
आज्ञापयामास च तौ चण्डमुण्डौ महाऽसुरौ॥ (409)

22. हे चण्ड हे मुण्ड बलैर्बहुभिः परिवारितौ ।
तत्र गच्छत गत्वा च सा समानीयतां लघु॥ (410)

23. केशेष्वाकृष्य बद्धा वा यदि वः संशयो युधि ।
तदाऽशेषा युधैः सर्वैरसुरैर्विनिहन्यताम्॥ (411)

24. तस्यां हतायां दुष्टायां सिंहे च विनिपातिते ।
शीघ्रमागम्यतां बद्धा गृहीत्वा तामथाम्बिकाम्॥ ॐ ॥ (412)

सत्यास्सन्तु यजमानस्य कामाः

ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः
नमः प्रकृत्यै भद्रायै नियताः प्रणतास्मताम् ।

साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
**शताक्ष्यै धूम्राक्ष्यै** नमः ॥

*****

## ॥ सप्तमोऽध्यायः ॥

## चण्डमुण्डवधः

1. ॐ ऋषिरुवाच॥ (413)

2. आज्ञप्तास्ते ततो दैत्याश्चण्डमुण्डपुरोगमाः ।
चतुरङ्गबलोपेता ययुरभ्युद्यतायुधाः॥ (414)

3. ददृशुस्ते ततो देवीमीषद्धासां व्यवस्थिताम् ।
सिंहस्योपरि शैलेन्द्रशृङ्गे महति काञ्चने॥ (415)

4. ते दृष्ट्वा तां समादातुमुद्यमं चक्रुरुद्यताः ।
आकृष्टचापासिधरास्तथाऽन्ये तत्समीपगाः॥ (416)

5. ततः कोपं चकारोच्चैरम्बिका तानरीन् प्रति ।
कोपेन चास्या वदनं मषीवर्णमभूत्तदा॥ (417)

6. भ्रुकुटीकुटिलात्तस्या ललाटफलकाद्द्रुतम् ।
काली करालवदना विनिष्क्रान्ताऽसि पाशिनी॥ (418)

7. विचित्रखट्वाङ्गधरा नरमालाविभूषणा ।
द्वीपिचर्मपरीधाना शुष्कमांसातिभैरवा॥ (419)

8. अतिविस्तारवदना जिह्वाललनभीषणा ।
निमग्नाऽऽरक्तनयना नादाऽऽपूरित दिङ्मुखा॥ (420)

9. सा वेगेनाभिपतिता घातयन्ती महाऽसुरान् ।
सैन्ये तत्र सुरारीणा,मभक्षयत तद्बलम्॥ (421)

10. पार्ष्णिग्राहाङ्कुशग्राहियोधघण्टासमन्वितान् ।
समादायैकहस्तेन मुखेचिक्षेप वारणान्॥ (422)

11. तथैव योधं तुरगै रथं सारथिना सह ।
निक्षिप्य वक्रे दशनैश्चर्वयन्त्यति भैरवम्॥ (423)

12. एकं जग्राह केशेषु ग्रीवायामथ चापरम् ।
पादेनाक्रम्य चैवाऽन्यमुरसाऽन्यमपोथयत्॥ (424)

13. तैर्मुक्तानि च शस्त्राणि महाऽस्त्राणि तथाऽसुरैः ।
मुखेन जग्राह रुषा दशनैर्मथितान्यपि॥ (425)

14. बलिनां तद्बलं सर्वमसुराणां दुरात्मनाम् ।
ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तथा॥ (426)

15. असिना निहताः केचित्केचित् खट्वाङ्गताडिताः ।
जग्मुर्विनाशमसुरा दन्ताग्राभिहतास्तथा॥ (427)

16. क्षणेन तद् बलं सर्वमसुराणां निपातितम् ।
दृष्ट्वा चण्डोऽभिदुद्राव तां कालीमतिभीषणाम्॥ (428)

17. शरवर्षैर्महाभीमैर्भीमाक्षीं तां महाऽसुरः ।
छादयामास चक्रैश्च मुण्डः क्षिप्तैः सहस्त्रशः॥ (429)

18. तानि चक्राण्यनेकानि विशमानानि तन्मुखम् ।
बभुर्यथार्कबिम्बानि सुबहूनि घनोदरम्॥ (430)

19. ततो जहासातिरुषा भीमं भैरवनादिनी ।
कालीकरालवक्त्रान्तर्दुर्दर्शदशनोज्ज्वला॥ (431)

20. उत्थाय च महाऽसिं हं देवी चण्डमधावत ।
गृहीत्वा चास्य केशेषु शिरस्तेनासिनाच्छिनत्॥ (432)

21. अथ मुण्डोऽभ्यधावत्तां दृष्ट्वा चण्डं निपातितम् ।
तमप्यपातयद्भूमौ सा खड्गाभिहतं रुषा॥ (433)

22. हतशेषं ततः सैन्यं दृष्ट्वा चण्डं निपातितम् ।
मुण्डं च सुमहावीर्यं दिशो भेजे भयातुरम्॥ (434)

23. शिरश्चण्डस्य काली च गृहीत्वा मुण्डमेव च ।
प्राह प्रचण्डाट्टहासमिश्रमभ्येत्य चण्डिकाम्॥ (435)

24. मया तवात्रोपहृतौ चण्डमुण्डौ महापशू ।
युद्धयज्ञे स्वयं शुम्भं निशुम्भं च हनिष्यसि॥ (436)

25. ऋषिरुवाच॥ (437)

26. तावानीतौ ततो दृष्ट्वा चण्डमुण्डौ महाऽसुरौ ।
उवाच कालीं कल्याणी ललितं चण्डिका वचः॥ (438)

27. यस्माच्चण्डं च मुण्डं च गृहीत्वा त्वमुपागता ।
चामुण्डेति ततो लोके ख्याता देवि भविष्यसि॥ ॐ॥ (439)

सत्यास्सन्तु यजमानस्य कामाः

ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः
नमः प्रकृत्यै भद्रायै नियताः प्रणतास्मताम् ।

साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
**कर्पूर बीजाधिष्ठात्र्यै काली चामुण्डादेव्यै** नमः॥

*****

# ॥ अष्टमोऽध्यायः ॥

## रक्तबीज वधः

1. ॐ ऋषिरुवाच॥ (440)

2. चण्डे च निहते दैत्ये मुण्डे च विनिपातिते ।
बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः॥ (441)

3. ततः कोपपराधीनचेताः शुम्भः प्रतापवान् ।
उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह॥ (442)

4. अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः ।
कम्बूनां चतुरशीतिर्निर्यान्तु स्वबलैर्वृताः॥ (443)

5. कोटिवीर्याणि पञ्चाशदसुराणां कुलानि वै ।
शतं कुलानि धौम्राणां निर्गच्छन्तु ममाज्ञया॥ (444)

6. कालका दौर्हृदा मौर्याः कालकेयास्तथाऽसुराः ।
युद्धाय सज्जा निर्यान्तु आज्ञया त्वरिता मम॥ (445)

7. इत्याज्ञाप्यासुरपतिः शुम्भो भैरवशासनः ।
निर्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः॥ (446)

8. आयान्तं चण्डिका दृष्ट्वा तत्सैन्यमतिभीषणम् ।
ज्यास्वनैः पूरयामास धरणीगगनान्तरम् ॥ (447)

9. ततः सिंहो महानादमतीव कृतवान् नृप ।
घण्टास्वनेन तन्नादमम्बिका चोपबृंहयत् ॥ (448)

10. धनुर्ज्यासिंहघण्टानां नादापूरितदिङ्मुखा ।
निनादैर्भीषणैः काली जिग्ये विस्तारितानना ॥ (449)

11. तं निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशम् ।
देवी सिंहस्तथा काली सरोषैः परिवारिताः ॥ (450)

12. एतस्मिन्नन्तरे भूप विनाशाय सुरद्विषाम् ।
भवायामरसिंहानामतिवीर्यबलान्विताः ॥ (451)

13. ब्रह्मेशगुहविष्णूनां तथेन्द्रस्य च शक्तयः ।
शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः ॥ (452)

14. यस्य देवस्य यद्रूपं यथाभूषणवाहनम् ।
तद्वदेव हि तच्छक्तिरसुरान् योद्धुमाययौ ॥ (453)

15. हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः ।
आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साऽभिदीयते ॥ (454)

16. माहेश्वरी वृषारूढा त्रिशूलवरधारिणी ।
महाऽहिवलया प्राप्ता चन्द्ररेखाविभूषणा॥ (455)

17. कौमारी शक्तिहस्ता च मयूरवरवाहना ।
योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी॥ (456)

18. तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता ।
शङ्खचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ॥ (457)

19. यज्ञवाराह मतुलं रूपं या बिभ्रतो हरेः ।
शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुम्॥ (458)

20. नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः ।
प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः॥ (459)

21. वज्रहस्ता तथैवैन्द्री गजराजोपरि स्थिता ।
प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा॥ (460)

22. ततः परिवृतस्ताभिरीशानो देवशक्तिभिः ।
हन्यन्तामसुराः शीघ्रं मम प्रीत्याऽऽह चण्डिकाम्॥ (461)

23. ततो देवीशरीरात्तु विनिष्क्रान्ताऽतिभीषणा ।
चण्डिकाशक्तिरत्युग्रा शिवाशतनिनादिनी॥ (462)

24. सा चाह धूम्रजटिलमीशानमपराजिता ।
दूत त्वं गच्छ भगवन् पार्श्वं शुम्भनिशुम्भयोः ॥ (463)

25. ब्रूहि शुम्भं निशुम्भं च दानवावतिगर्वितौ ।
ये चान्ये दानवास्तत्र युद्धाय समुपस्थिताः ॥ (464)

26. त्रैलोक्यमिन्द्रो लभतां देवाः सन्तु हविर्भुजः ।
यूयं प्रयात पातालं यदि जीवितुमिच्छथ ॥ (465)

27. बलावलेपादथ चेद्भवन्तो युद्धकांक्षिणः ।
तदाऽऽगच्छत तृप्यन्तु मच्छिवाः पिशितेन वः ॥ (466)

28. यतो नियुक्तो दौत्येन तया देव्या शिवः स्वयम् ।
शिवदूतीति लोकेऽस्मिंस्ततः सा ख्यातिमागता ॥ (467)

29. तेऽपि श्रुत्वा वचो देव्याः शर्वाख्यातं महाऽसुराः ।
अमर्षापूरिता जग्मुर्यत्र कात्यायनी स्थिता ॥ (468)

30. ततः प्रथममेवाग्रे शर शक्त्यृष्टिवृष्टिभिः ।
ववर्षुरुद्धतामर्षास्तां देवीममरारयः ॥ (469)

31. सा च तान् प्रहितान् बाणाञ्छूलशक्तिपरश्वधान् ।
चिच्छेद लीलयाऽऽध्मातधनुर्मुक्तैर्महेषुभिः ॥ (470)

32. तस्याग्रतस्तथा काली शूलपातविदारितान् ।
खट्वाङ्गपोथितांश्चारीन् कुर्वती व्यचरत्तदा ॥ (471)

33. कमण्डलुजलाक्षेपहतवीर्यान् हतौजसः ।
ब्रह्माणी चाकरोच्छत्रून् येन येन स्म धावति ॥ (472)

34. माहेश्वरीत्रिशूलेन तथा चक्रेण वैष्णवी ।
दैत्याञ्जघान कौमारी तथा शक्त्यातिकोपना ॥ (473)

35. ऐन्द्रीकुलिशपातेन शतशो दैत्यदानवाः ।
पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षिणः ॥ (474)

36. तुण्डप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः ।
वाराहमूर्त्या न्यपतंश्चक्रेण च विदारिताः ॥ (475)

37. नखैर्विदारितांश्चान्यान् भक्षयन्ती महाऽसुरान् ।
नारसिंही चचाराजौ नादापूर्णदिगम्बरा ॥ (476)

38. चण्डाट्टहासैरसुराः शिवदूत्यभिदूषिताः ।
पेतुः पृथिव्यां पतितांस्तांश्चखादाथ सा तदा ॥ (477)

39. इति मातृगणं क्रुद्धं मर्दयन्तं महाऽसुरान् ।
दृष्ट्वाऽभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ॥ (478)

40. पलायनपरान् दृष्ट्वा दैत्यान् मातृगणार्दितान् ।
योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महाऽसुरः ॥ (479)

41. रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरतः ।
समुत्पतति मेदिन्यां तत्प्रमाणस्तदाऽसुरः ॥ (480)

42. युयुधे स गदापाणिरिन्द्रशक्त्या महाऽसुरः ।
ततश्चैन्द्री स्ववज्रेण रक्तबीजमताडयत् ॥ (481)

43. कुलिशेनाहतस्याशु बहु सुस्राव शोणितम् ।
समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः ॥ (482)

44. यावन्तः पतितास्तस्य शरीराद् रक्तबिन्दवः ।
तावन्तः पुरुषा जातास्तद्वीर्यबलविक्रमाः ॥ (483)

45. ते चापि युयुधुस्तत्र पुरुषा रक्तसंभवाः ।
समं मातृभिरत्युग्रशस्त्रपातातिभीषणम् ॥ (484)

46. पुनश्च वज्रपातेन क्षतमस्य शिरो यदा ।
ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः ॥ (485)

47. वैष्णवी समरे चैनं चक्रेणाभिजघान ह ।
गदया ताडयामास ऐन्द्री तमसुरेश्वरम् ॥ (486)

48. वैष्णवी चक्रभिन्नस्य रुधिरस्त्रावसम्भवैः ।
सहस्त्रशो जगद्व्याप्तं तत्प्रमाणैर् महाऽसुरैः ॥ (487)

49. शक्त्या जघान कौमारी वाराही च तथाऽसिना ।
माहेश्वरी त्रिशूलेन रक्तबीजं महाऽसुरम् ॥ (488)

50. स चापि गदया दैत्यः सर्वा एवाहनत् पृथक् ।
मातृः कोप समाविष्टो रक्तबीजो महाऽसुरः ॥ (489)

51. तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि ।
पपात यो वै रक्तौघस्तेनासञ्छतशोऽसुराः ॥ (490)

52. तैश्चासुरासृक्संभूतैरसुरैः सकलं जगत् ।
व्याप्त मासीत्ततो देवा भयमाजग्मुरुत्तमम् ॥ (491)

53. तान् विषण्णान् सुरान् दृष्ट्वा चण्डिका प्राह सत्वरा ।
उवाच कालीं चामुण्डे विस्तीर्णं वदनं कुरु ॥ (492)

54. मच्छस्त्रपातसम्भूतान् रक्तबिन्दून् महाऽसुरान् ।
रक्तबिन्दोः प्रतीच्छ त्वं वक्त्रेणानेन वेगिना ॥ (493)

55. भक्षयन्ती चर रणे तदुत्पन्नान्महाऽसुरान् ।
एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति ॥ (494)

56. भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे ।
इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तम्॥ (495)

57. मुखेन काली जगृहे रक्तबीजस्य शोणितम् ।
ततोऽसावाजघानाथ गदया तत्र चण्डिकाम्॥ (496)

58. न चास्या वेदनां चक्रे गदापातोऽल्पिकामपि ।
तस्या हतस्य देहात्तु बहु सुस्राव शोणितम्॥ (497)

59. यतस्ततस्तद्वक्रेण चामुण्डा संप्रतीच्छति ।
मुखे समुद्गता येऽस्या रक्तपातान्महाऽसुराः॥ (498)

60. तांश्चखादाथ चामुण्डा पपौ तस्य च शोणितम् ।
देवी शूलेन वज्रेण बाणैरसिभिर्ऋष्टिभिः॥ (499)

61. जघान रक्तबीजं तं चामुण्डा पीतशोणितम् ।
स पपात महीपृष्ठे शस्त्रसङ्घसमाहतः॥ (500)

62. नीरक्तश्चमहीपाल रक्तबीजो महाऽसुरः ।
ततस्ते हर्ष मतुलमवापुस्त्रिदशा नृप॥ (501)

63. तेषां मातृगणो जातो ननर्ता सृङ्मदोद्धतः॥ ॐ॥ (502)

सत्यास्सन्तु यजमानस्य कामाः

ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः
नमः प्रकृत्यै भद्रायै नियताः प्रणतास्मताम् ।

साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
**अष्टमातृका सहितायै रक्ताक्ष्यै देव्यै** नमः ॥

*****

# ॥ नवमोऽध्यायः ॥

## निशुम्भ वधः

1. ॐ राजोवाच॥ (503)

2. विचित्रमिदमाख्यातं भगवन् भवता मम ।
देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितम्॥ (504)

3. भूयश्चेच्छाम्यहं श्रोतुं रक्तबीजे निपातिते ।
चकार शुम्भो यत्कर्म निशुम्भश्चातिकोपनः॥ (505)

4. ऋषिरुवाच॥ (506)

5. चकारकोप मतुलं रक्तबीजे निपातिते ।
शुम्भासुरो निशुम्भश्च हतेष्वन्येषु चाहवे॥ (507)

6. हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन् ।
अभ्यधावन्निशुम्भोऽथ मुख्ययाऽसुरसेनया॥ (508)

7. तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महाऽसुराः ।
संदष्टौष्ठपुटाः क्रुद्धा हन्तुं देवीमुपाययुः॥ (509)

8. आजगाम महावीर्यः शुम्भोऽपि स्वबलैर्वृतः ।

निहन्तुं चण्डिकां कोपात्कृत्वा युद्दं तु मातृभिः॥ (510)

9. ततो युद्धमतीवासीद्देव्या शुम्भनिशुम्भयोः ।
शरवर्षमतीवोग्रं मेघयोरिव वर्षतोः ||511|

10. चिच्चेदास्ताञ्छरांस्ताभ्यां चण्डिका स्वशरोत्करैः ।
ताडयामास चाङ्गेषु शस्त्रौघैरसुरेश्वरौ॥ (512)

11. निशुम्भो निशितं खड्गं चर्म चादाय सुप्रभम् ।
अताडयन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमम्॥ (513)

12. ताडिते वाहने देवी क्षुर प्रेणासिमुत्तमम् ।
निशुम्भस्याशु चिच्छेद चर्म चाप्यष्टचन्द्रकम्॥ (514)

13. छिन्ने चर्मणि खड्गे च शक्तिं चिक्षेप सोऽसुरः ।
तामप्यस्य द्विधा चक्रे चक्रेणाभिमुखागताम्॥ (515)

14. कोपाध्मातो निशुम्भोऽथ शूलं जग्राह दानवः ।
आयातं मुष्टिपातेन देवी तच्चाप्यचूर्णयत्॥ (516)

15. आविध्याथ गदां सोऽपि चिक्षेप चण्डिकां प्रति ।
साऽपि देव्या त्रिशूलेन भिन्ना भस्मत्वमागता॥ (517)

16. ततः परशुहस्तं तमायान्तं दैत्यपुङ्गवं ।

आहत्य देवी बाणौघैरपातयत भूतले॥ (518)

17. तस्मिन्निपतिते भूमौ निशुम्भे भीमविक्रमे ।
भ्रातर्यतीव संक्रुद्धः प्रययौ हन्तुमम्बिकाम्॥ (519)

18. स रथस्थस्तथाऽत्युच्चैर्गृहीतपरमायुधैः ।
भुजैरष्टाभिरतुलैर्व्याप्याशेषं बभौ नभः॥ (520)

19. तमायान्तं समालोक्य देवी शङ्खमवादयत् ।
ज्याशब्दं चापि धनुषश्चकारातीव दुःसहम्॥ (521)

20. पूरयामास ककुभो निजघण्टास्वनेन च ।
समस्तदैत्यसैन्यानां तेजोवधविधायिना॥ (522)

21. ततः सिंहो महानादैस्त्याजितेभमहामदैः ।
पूरयामास गगनं गां तथैव दिशो दश॥ (523)

22. ततः काली समुत्पत्य गगनं क्ष्मामताडयत् ।
कराभ्यां तन्निनादेन प्राक्स्वनास्ते तिरोहिताः ॥ (524)

23. अट्टाट्टहासमशिवं शिवदूतीचकार ह ।
तैः शब्दैरसुरास्त्रेसुः शुम्भः कोपं परं ययौ॥ (525)

24. दुरात्मंस्तिष्ठ तिष्ठेति व्याजहाराम्बिका यदा ।

तदा जयेत्यभिहितं देवैराकाशसंस्थितैः ॥ (526)

25. शुम्भेनागत्य या शक्तिर्मुक्ता ज्वालातिभीषणा ।
आयान्ती वह्निकूटाभा सा निरस्ता महोल्कया ॥ (527)

26. सिंहनादेन शुम्भस्य व्याप्तं लोकत्रयान्तरम् ।
निर्घातनिःस्वनो घोरो जितवानवनीपते ॥ (528)

27. शुम्भमुक्ताञ्छरान्देवी शुम्भस्तत्प्रहिताञ्छरान् ।
चिच्छेद स्वशरै रुग्रैः शतशोऽथ सहस्रशः ॥ (529)

28. ततः सा चण्डिका क्रुद्धा शूलेनाभिजघान तम् ।
स तदाऽभिहतो भूमौ मूर्च्छितो निपपात ह ॥ (530)

29. ततो निशुम्भः संप्राप्य चेतनामात्तकार्मुकः ।
आजघान शरैर्देवीं कालीं केसरिणं तथा ॥ (531)

30. पुनश्च कृत्वा बाहूनामयुतं दनुजेश्वरः ।
चक्रायुधेन दितिजश्छादयामास चण्डिकाम् ॥ (532)

31. ततो भगवती क्रुद्धा दुर्गा दुर्गार्तिनाशिनी ।
चिच्छेद तानि चक्राणि स्वशरैः सायकांश्च तान् ॥ (533)

32. ततो निशुम्भो वेगेन गदामादाय चण्डिकाम् ।

अभ्यधावत वै हन्तुं दैत्यसेनासमावृतः॥ (534)

33. तस्यापतत एवाशु गदां चिच्छेद चण्डिका ।
खड्गेन शितधारेण स च शूलं समाददे॥ (535)

34. शूलहस्तं समायान्तं निशुम्भममरार्दनम् ।
हृदि विव्याध शूलेन वेगाविद्धेन चण्डिका॥ (536)

35. भिन्नस्य तस्य शूलेन हृदयान्निःसृतोऽपरः ।
महाबलो महावीर्यस्तिष्ठेति पुरुषो वदन्॥ (537)

36. तस्य निष्क्रामतो देवी प्रहस्य स्वनवत्ततः ।
शिरश्चिच्छेद खड्गेन ततोऽसावपतद्भुवि॥ (538)

37. ततः सिंहश्चखादोग्रं दंष्ट्रा क्षुण्णशिरोधरान् ।
असुरांस्तांस्तथा काली शिवदूती तथाऽपरान्॥ (539)

38. कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महाऽसुराः ।
ब्रह्माणीमन्त्रपूतेन तोयेनान्ये निराकृताः॥ (540)

39. माहेश्वरीत्रिशूलेन भिन्नाः पेतुस्तथाऽपरे ।
वाराहीतुण्डघातेन केचिच्छूर्णीकृता भुवि॥ (541)

40. खण्डं खण्डं च चक्रेण वैष्णव्या दानवाः कृताः ।

वज्रेण चैन्द्रीहस्ताग्रविमुक्तेन तथाऽपरे॥ (542)

41. केचिद्विनेशुरसुराः केचिन्नष्टा महाऽऽहवात् ।
भक्षिताश्चापरे कालीशिवदूतीमृगाधिपैः।ॐ ॥ |(543)

सत्यास्सन्तु यजमानस्य कामाः

ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः
नमः प्रकृत्यै भद्रायै नियताः प्रणतास्मताम् ।

साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
वाग्भव बीजाधिष्ठात्र्यै श्री महाकाल्यै नमः ॥

*****

# ॥ दशमोऽध्यायः ॥

## शुम्भ वधः

1. ॐ ऋषिरुवाच॥ (544)

2. निशुम्भं निहतं दृष्ट्वा भ्रातरं प्राणसम्मितं ।
हन्यमानं बलं चैव शुम्भः कृद्धोऽब्रवीद्वचः॥ (545)

3. बलावलेपाद्दुष्टे त्वं मा दुर्गे गर्व मावह ।
अन्यासां बलमाश्रित्य युद्ध्यसे यातिमानिनी॥ (546)

4. देव्युवाच॥ (547)

5. एकैवाऽहं जगत्यत्र द्वितीया का ममापरा ।
पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः॥ (548)

6. ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयम् ।
तस्या देव्यास्तनौ जग्मुरेकैवाऽऽसीत्तदाऽम्बिका॥ (549)

7. देव्युवाच॥ (550)

8. अहं विभूत्या बहुभिरिह रूपैर्यदास्थिता ।
तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव॥ (551)

9. ऋषिरुवाच॥ (552)

10. ततः प्रववृते युद्धं देव्याः शुम्भस्य चोभयोः ।
पश्यतां सर्वदेवानामसुराणां च दारुणम्॥ (553)

11. शरवर्षैः शितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः ।
तयोर्युद्धमभूद्भूयः सर्वलोकभयङ्करम्॥ (554)

12. दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथाऽम्बिका ।
बभञ्ज तानि दैत्येन्द्रस्तत्प्रतीघातकर्तृभिः॥ (555)

13. मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी ।
बभञ्ज लीलयैवोग्रहुङ्कारोच्चारणादिभिः॥ (556)

14. ततः शरशतैर्देवीमाच्छादयत सोऽसुरः ।
सापि तत् कुपितादेवी धनुश्चिच्छेद चेषुभिः॥ (557)

15. छिन्ने धनुषि दैत्येन्द्रस्तथा शक्तिमथाददे ।
चिच्छेद देवी चक्रेण तामप्यस्य करे स्थिताम्॥ (558)

16. ततः खड्गमुपादाय शतचन्द्रं च भानुमत् ।
अभ्यधावत्तदा देवीं दैत्यानामधिपेश्वरः॥ (559)

17. तस्याऽऽपतत एवाशु खड्गं चिच्छेद चण्डिका ।

धनुर्मुक्तैः शितैर्बाणैः चर्म चार्ककरामलम्॥ (560)

18. हताश्वः स तदा दैत्यश्छिन्नधन्वा विसारथिः ।
जग्राह मुद्गरं घोरमम्बिकानिधनोद्यतः॥ (561)

19. चिच्छेदाऽऽपततस्तस्य मुद्गरं निशितैः शरैः ।
तथापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेगवान्॥ (562)

20. स मुष्टिं पातयामास हृदये दैत्यपुङ्गवः ।
देव्यास्तं चापि सा देवी तलेनोरस्यताडयत्॥ (563)

21. तलप्रहाराभिहतो निपपात महीतले ।
स दैत्यराजः सहसा पुनरेव तथोत्थितः॥ (564)

22. उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थितः ।
तत्रापि सा निराधारा युयुधे तेन चण्डिका॥ (565)

23. नियुद्धं खे तदा दैत्यश्चण्डिका च परस्परम् ।
चक्रतुः प्रथमं सिद्धमुनिविस्मयकारकम्॥ (566)

24. ततो नियुद्धं सुचिरं कृत्वा तेनाम्बिका सह ।
उत्पात्य भ्रामयामास चिक्षेप धरणीतले॥ (567)

25. स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य वेगितः ।

अभ्यधावत दुष्टात्मा चण्डिकानिधनेच्छया॥ (568)

26. तमायान्तं ततो देवी सर्वदैत्यजनेश्वरम् ।
जगत्यां पातयामास भित्वा शूलेन वक्षसि॥ (569)

27. स गतासुः पपातोर्व्यां देवीशूलाग्रविक्षतः ।
चालयन् सकलां पृथ्वीं साब्धिद्वीपांसपर्वताम्॥ (570)

28. ततः प्रसन्न मखिलं हते तस्मिन् दुरात्मनि ।
जगत् स्वास्थ्यमतीवाप निर्मलं चाभवन्नभः॥ (571)

29. उत्पातमेघाः सोल्का ये प्रागासंस्ते शमं ययुः ।
सरितो मार्गवाहिन्यस्तथाऽऽसंस्तत्र पातिते॥ (572)

30. ततो देवगणाः सर्वे हर्षनिर्भरमानसाः ।
बभूवुर्निहते तस्मिन् गन्धर्वा ललितं जगुः॥ (573)

31. अवादयंस्तथैऽवान्ये ननृतुऽश्चाप्सरोगणाः ।
ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद्दिवाकरः॥ (574)

32. जज्वलुश्चाग्नयः शान्ताः शांता दिग्जनितस्वनाः॥ ॐ॥ (575)

सत्यास्सन्तु यजमानस्य कामाः

ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः
नमः प्रकृत्यै भद्रायै नियताः प्रणतास्मताम् ।

साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
सिंह वाहिन्यै त्रिशूल पाशधारिण्यै नमः ॥

*****

## ॥ एकादशोऽध्यायः ॥

## नारायणी स्तुतिः

1. ॐ ऋषिरुवाच॥ (576)

2. देव्या हते तत्र महाऽसुरेन्द्रे
सेन्द्राः सुरावह्निपुरोगमास्ताम् ।
कात्यायनीं तुष्टुवुरिष्टलाभात्
विकाशिवक्त्राब्जविकाशिताशाः॥ (577)

3. देवि प्रपन्नार्तिहरे प्रसीद
प्रसीद मातर् जगतोऽखिलस्य ।
प्रसीद विश्वेश्वरि पाहि विश्वं
त्वमीश्वरी देवि चराचरस्य॥ (578)

4. आधारभूता जगतस्त्वमेका
महीस्वरूपेण यतः स्थिताऽसि ।
अपां स्वरूपस्थितया त्वयैत
दाप्यायते कृत्स्नमलङ्घ्यवीर्ये॥ (579)

5. त्वं वैष्णवी शक्तिरनन्त वीर्या

विश्वस्य बीजं परमाऽसि माया ।
सम्मोहितं देवि समस्तमेतत्
त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥ (580)

6. विद्याः समस्तास्तव देवि भेदाः
स्त्रियः समस्ताः सकला जगत्सु ।
त्वयैकया पूरितमम्बयैतत्,
का ते स्तुतिः स्तव्यपरा परोक्तिः ॥ (581)

7. सर्वभूता यदादेवी स्वर्गमुक्तिप्रदायिनी ।
त्वं स्तुता स्तुतये का वा भवन्तु परमोक्तयः ॥ (582)

8. सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते ।
स्वर्गापऽवर्गदे देवि नारायणि नमोऽस्तु ते ॥ (583)

9. कलाकाष्ठादिरूपेण परिणामप्रदायिनि ।
विश्वस्योपरतौ शक्ते नारायणि नमोऽस्तु ते ॥ (584)

10. सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥ (585)

11. सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि ।
गुणाश्रये गुणमये नारायणि नमोऽस्तु ते ॥ (586)

12. शरणागतदीनार्तपरित्राण परायणे ।
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते॥ (587)

13. हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि ।
कौशाम्भः क्षरिके देवि नारायणि नमोऽस्तु ते॥ (588)

14. त्रिशूलचन्द्राहिधरे महावृषभवाहिनि ।
माहेश्वरीस्वरूपेण नारायणि नमोऽस्तु ते॥ (589)

15. मयूरकुक्कुटवृते महाशक्तिधरेऽनघे ।
कौमारीरूपसंस्थाने नारायणि नमोऽस्तु ते॥ (590)

16. शङ्खचक्रगदाशार्ङ्गगृहीतपरमायुधे ।
प्रसीदवैष्णवीरूपे नारायणि नमोऽस्तु ते॥ (591)

17. गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुन्धरे ।
वराहरूपिणि शिवे नारायणि नमोऽस्तु ते ॥ (592)

18. नृसिंहरूपेणोग्रेण हन्तुं दैत्यान् कृतोद्यमे ।
त्रैलोक्यत्राणसहिते नारायणि नमोऽस्तु ते॥ (593)

19. किरीटिनि महावज्रे सहस्रनयनोज्ज्वले ।
वृत्रप्राणहरे चैन्द्रि नारायणि नमोऽस्तु ते॥ (594)

20. शिवदूतीस्वरूपेण हतदैत्यमहाबले ।
घोररूपे महारावे नारायणि नमोऽस्तुते॥ (595)

21. दंष्ट्रा करालवदने शिरोमालाविभूषणे ।
चामुण्डे मुण्डमथने नारायणि नमोऽस्तु ते॥ (596)

22. लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टिस्वधे ध्रुवे ।
महारात्रि महाऽविद्ये नारायणि नमोऽस्तु ते॥ (597)

23. मेधे सरस्वति वरे भूति बाभ्रवि तामसि ।
नियते त्वं प्रसीदेशे नारायणि नमोऽस्तु ते॥ (598)

24. सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते॥ (599)

25. एतत् ते वदनं सौम्यं लोचनत्रयभूषितम् ।
पातु नः सर्वभीतिभ्यः कात्यायनि नमोऽस्तु ते॥ (600)

26. ज्वाला कराल मत्युग्रमशेषासुरसूदनम् ।
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते॥ (601)

27. हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ।
सा घण्टा पातु नो देवि पापेभ्योऽनःसुतानिव॥ (602)

28. असुरासृग्वसापङ्कचर्चितस्ते करोज्ज्वलः ।
शुभाय खड्गो भवतु चण्डिके त्वां नता वयम्॥ (603)

29. रोगानशेषानपहंसि तुष्टा,
रुष्टा तु कामान् सकलानभीष्टान् ।
त्वामाश्रितानां न विपन्नराणां,
त्वामाश्रिता ह्याश्रयतां प्रयान्ति॥ (604)

30. एतत् कृतं यत् कदनं त्वयाऽद्य,
धर्मद्विषां देवि महाऽसुराणाम् ।
रूपैरनेकैर्बहुधाऽऽत्ममूर्तिं,
कृत्वाऽम्बिके तत् प्रकरोति कान्या॥ (605)

31. विद्यासु शास्त्रेषु विवेकदीपे
ष्वाद्येषु वाक्येषु च का त्वदन्या ।
ममत्वगर्तेऽतिमहान्धकारे,
विभ्रामयत्येतदतीव विश्वम्॥ (606)

32. रक्षांसि यत्रोग्रविषाश्च नागा,
यत्रारयो दस्युबलानि यत्र ।
दावानलो यत्र तथाऽब्धिमध्ये,

तत्र स्थिता त्वं परिपासि विश्वम्॥ (607)

33. विश्वेश्वरि त्वं परिपासि विश्वं,

विश्वात्मिका धारयसीति विश्वम् ।

विश्वेशवन्द्या भवती भवन्ति

विश्वाश्रया ये त्वयि भक्तिनम्राः॥ (608)

34. देवि प्रसीद परिपालय नोऽरिभीतेः,

नित्यं यथासुर वधादधुनैव सद्यः ।

पापानि सर्वजगतां प्रशमं नयाशु,

उत्पातपाकजनितांश्च महोपसर्गान्॥ (609)

35. प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि ।

त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव॥ (610)

36. देव्युवाच॥ (611)

37. वरदाऽहं सुरगणा वरं यन्मन सेच्छथ ।

तं वृणुध्वं प्रयच्छामि जगतामुपकारकम्॥ (612)

38. देवा ऊचुः॥ (613)

39. सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ।

एवमेव त्वया कार्यमस्मद्वैरिविनाशनम्॥ (614)

40. देव्युवाच॥ (615)

41. वैवस्वतेऽन्तरे प्राप्ते अष्टाविंशतिमे युगे ।
शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महाऽसुरौ॥ (616)

42. नन्दगोपगृहे जाता यशोदागर्भसंभवा ।
ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी॥ (617)

43. पुनरप्यतिरौद्रेण रूपेण पृथिवीतले ।
अवतीर्य हनिष्यामि वैप्र चित्तांस्तु दानवान्॥ (618)

44. भक्ष्यन्त्याश्च तानुग्रान् वैप्रचित्तान्महाऽसुरान् ।
रक्ता दन्ता भविष्यन्ति दाडिमीकुसुमो पमाः॥ (619)

45. ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः
स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकाम्॥ (620)

46. भूयश्च शतवार्षिक्यामनावृष्ट्यामनम्भसि ।
मुनिभिः संस्मृता भूमौ सम्भविष्याम्ययोनिजा॥ (621)

47. ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन् ।
कीर्तयिष्यन्ति मनुजाः शताक्षीमिति मां ततः॥ (622)

48. ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः ।
भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः॥ (623)

49. शाकम्भरीति विख्यातिं तदा यास्याम्यहं भुवि ।
तत्रैव च वधिष्यामि दुर्गमाख्यं महाऽसुरम्॥ (624)

50. दुर्गादेवीति विख्यातं तन्मे नाम भविष्यति ।
पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले॥ (625)

51. रक्षांसि भक्षयिष्यामि मुनीनां त्राणकारणात् ।
तदा मां मुनयः सर्वे स्तोष्यन्त्यानम्रमूर्तयः॥ (626)

52. भीमादेवीति विख्यातं तन्मे नाम भविष्यति ।
यदारुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति॥ (627)

53. तदाऽहं भ्रामरं रूपं कृत्वाऽसंख्येयषट्पदम् ।
त्रैलोक्यस्य हितार्थाय वधिष्यामि महाऽसुरम्॥ (628)

54. भ्रामरीति च मां लोकास्तदा स्तोष्यन्ति सर्वतः ।
इत्थं यदा यदा बाधा दानवोत्था भविष्यति॥ (629)

55. तदा तदावतीर्याऽहं करिष्याम्यरिसंक्षयम्। ॐ॥ (630)

सत्यास्सन्तु यजमानस्य कामाः

ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः
नमः प्रकृत्यै भद्रायै नियताः प्रणतास्मताम् ।

साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
**सर्वनारायण्यै** नमः ॥

*****

# ॥ द्वादशोऽध्यायः ॥

## फलस्तुतिः

1. ॐ देव्युवाच॥ (631)

2. एभिः स्तवैश्च मां नित्यं स्तोष्यते यः समाहितः ।
तस्याऽहं सकलां बाधां नाशयिष्याम्यऽसंशयम्॥ (632)

3. मधुकैटभनाशं च महिषासुरघातनम् ।
कीर्तयिष्यन्ति ये तद्वद् वधं शुम्भनिशुम्भयोः॥ (633)

4. अष्टम्यां च चतुर्दश्यां नवम्यां चैकचेतसः ।
श्रोष्यन्ति चैव ये भक्त्या मम माहात्म्यमुत्तमम्॥ (634)

5. न तेषां दुष्कृतं किञ्चिद् दुष्कृतोत्था न चापदः ।
भविष्यति न दारिद्र्यं न चैवेष्टवियोजनम्॥ (635)

6. शत्रुतो न भयं तस्य दस्युतो वा न राजतः ।
न शस्त्रानलतोयौघात्कदाचित्सम्भविष्यति॥ (636)

7. तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः ।
श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं हि तत्॥ (637)

8. उपसर्गानशेषांस्तु महामारीसमुद्भवान् ।
तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ॥ (638)

9. यत्रैतत्पठ्यते सम्यङ्नित्यमायतने मम ।
सदा न तद्विमोक्ष्यामि सान्निध्यं तत्र मे स्थितम् ॥ (639)

10. बलिप्रदाने पूजायामग्निकार्ये महोत्सवे ।
सर्वं ममैतच्चरितमुच्चार्यं श्राव्यमेव च ॥ (640)

11. जानताऽजानता वापि बलिपूजां तथा कृताम् ।
प्रतीच्छिष्याम्यहं प्रीत्या वह्निहोमं तथा कृतम् ॥ (641)

12. शरत्काले महापूजा क्रियते या च वार्षिकी ।
तस्यान्ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ॥ (642)

13. सर्वाबाधाविनिर्मुक्तो धनधान्यसुतान्वितः ।
मनुष्यो मत्प्रसादेन भविष्यति न संशयः ॥ (643)

14. श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः ।
पराक्रमं च युद्धेषु जायते निर्भयः पुमान् ॥ (644)

15. रिपवः संक्षयं यान्ति कल्याणं चोपपद्यते ।
नन्दते च कुलं पुंसां माहात्म्यं ममशृण्वताम् ॥ (645)

16. शान्तिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने ।
ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम ॥ (646)

17. उपसर्गाः शमं यान्ति ग्रहपीडाश्च दारुणाः ।
दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते ॥ (647)

18. बालग्रहाभिभूतानां बालानां शान्तिकारकम् ।
संघातभेदे च नृणां मैत्रीकरणमुत्तमम् ॥ (648)

19. दुर्वृत्तानामशेषाणां बलहानिकरं परम् ।
रक्षोभूतपिशाचानां पठनादेव नाशनम् ॥ (649)

20. सर्वंममैतन्माहत्म्यं मम सन्निधिकारकम् ।
पशुपुष्पार्घ्यधूपैश्च गन्धदीपैस्तथोत्तमैः ॥ (650)

21. विप्राणां भोजनैर्होमैः प्रोक्षणीयैरहर्निशम् ।
अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्सरेण या ॥ (651)

22. प्रीतिर्मे क्रियते साऽस्मिन् सकृत्सुचरिते श्रुते ।
श्रुतं हरति पापानि तथाऽऽरोग्यं प्रयच्छति ॥ (652)

23. रक्षां करोति भूतेभ्यो जन्मनां कीर्तनं मम ।
युद्धेषु चरितं यन्मे दुष्टदैत्यनिबर्हणम् ॥ (653)

24. तस्मिन्श्रुते वैरिकृतं भयं पुंसां न जायते ।
युष्माभिः स्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः ॥ (654)

25. ब्रह्मणा च कृतास्तास्तु प्रयच्छन्ति शुभां मतिम् ।
अरण्ये प्रान्तरे वापि दावाग्निपरिवारितः ॥ (655)

26. दस्युभिर्वा वृतः शून्ये गृहीतो वापि शत्रुभिः ।
सिंहव्याघ्रानुयातो वा वने वा वनहस्तिभिः ॥ (656)

27. राज्ञा क्रुद्धेन चाज्ञप्तो वध्यो बन्धगतोऽपि वा ।
आघूर्णितो वा वातेन स्थितः पोते महार्णवे ॥ (657)

28. पतत्सु चापि शस्त्रेषु सङ्ग्रामे भृशदारुणे ।
सर्वाबाधाशु घोरासु वेदनाऽभ्यर्दितोऽपि वा ॥ (658)

29. स्मरन्ममैतच्चरितं नरो मुच्येत सङ्कटात् ।
मम प्रभावात्सिंहाद्या दस्यवो वैरिणस्तथा ॥ (659)

30. दूरादेव पलायन्ते स्मरतश्चरितं मम ॥ (660)

31. ऋषिरुवाच ॥ (661)

32. इत्युक्त्वा सा भगवती चण्डिका चण्डविक्रमा ॥ (662)

33. पश्यतामेव देवानां तत्रैवाऽन्तरधीयत ।

तेऽपि देवा निरातङ्काः स्वाधिकारान् यथा पुरा॥ (663)

34. यज्ञभागभुजः सर्वे चक्रुर्विनिहतारयः ।
दैत्याश्च देव्या निहते शुम्भे देवरिपौ युधि॥ (664)

35. जगद्विध्वंसिनि तस्मिन् महोग्रेऽतुलविक्रमे ।
निशुम्भे च महावीर्ये शेषाः पातालमाययुः॥ (665)

36. एवं भगवती देवी सा नित्याऽपि पुनः पुनः ।
संभूय कुरुते भूप जगतः परिपालनम्॥ (666)

37. तयैतन्मोह्यते विश्वं सैव विश्वं प्रसूयते ।
सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति॥ (667)

38. व्याप्तं तयैतत् सकलं ब्रह्माण्डं मनुजेश्वर ।
महाकाल्या महाकाले महामारीस्वरूपया॥ (668)

39. सैव काले महामारी सैव सृष्टिर् भवत्यजा ।
स्थितिं करोति भूतानां सैव काले सनातनी॥ (669)

40. भवकाले नृणां सैव लक्ष्मीर्वृद्धिप्रदा गृहे ।
सैवाऽभावे तथाऽलक्ष्मीर्विनाशायोपजायते॥ (670)

41. स्तुता सम्पूजिता पुष्पैर्धूप गन्धादिभिस्तथा ।

ददाति वित्तं पुत्रांश्च मतिं धर्मे गतिं शुभाम्॥ ॐ॥ (671)

सत्यास्सन्तु यजमानस्य कामाः

ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः
नमः प्रकृत्यै भद्रायै नियताः प्रणतास्मताम् ।

साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
श्री बालात्रिपुर सुन्दर्यै नमः ॥

*****

## ॥ त्रयोदशोऽध्यायः ॥

## सुरथ वैश्ययोः वरप्रदानम्

1. ॐ ऋषिरुवाच॥ (672)

2. एतत् ते कथितं भूप देवीमाहात्म्यमुत्तमम् ।
एवम् प्रभावा सा देवी ययेदं धार्यते जगत्॥ (673)

3. विद्या तथैव क्रियते भगवद्विष्णुमायया ।
तया त्वमेष वैश्यश्च तथैवान्ये विवेकिनः॥ (674)

4. मोह्यन्ते मोहिताश्चैव मोहमेष्यन्ति चापरे ।
तामुपैहि महाराज शरणं परमेश्वरीम्॥ (675)

5. आराधिता सैव नृणां भोगस्वर्गाऽपवर्गदा॥ (676)

6. मार्कण्डेय उवाच॥ (677)

7. इति तस्य वचः श्रुत्वा सुरथः स नराधिपः॥ (678)

8. प्रणिपत्य महाभागं तमृषिं शंसितव्रतम् ।
निर्विण्णोऽतिममत्वेन राज्यापहरणेन च॥ (679)

9. जगाम सद्यस्तपसे स च वैश्यो महामुने ।

संदर्शनार्थमंबाया नदीपुलिनसंस्थितः ॥ (680)

10. स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन् ।
तौ तस्मिन् पुलिने देव्याः कृत्वा मूर्तिं महीमयीम् ॥ (681)

11. अर्हणां चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः ।
निराहारौ यताहारौ तन्मनस्कौ समाहितौ ॥ (682)

12. ददतुस्तौ बलिं चैव निजगात्रासृगुक्षितम् ।
एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः ॥ (683)

13. परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चण्डिका ॥ (684)

14. देव्युवाच ॥ (685)

15. यत्प्रार्थ्यते त्वया भूप त्वया च कुलनन्दन
मत्तस्तत् प्राप्यतां सर्वं परितुष्टा ददामि तत् ॥ (686)

16. मार्कण्डेय उवाच ॥ (687)

17. ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि ।
अत्रैव च निजं राज्यं हतशत्रुबलं बलात् ॥ (688)

18. सोऽपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः ।
ममेत्यहमिति प्राज्ञः सङ्गविच्युतिकारकम् ॥ (689)

19. देव्युवाच॥ (690)

20. स्वल्पैरहोभिर्नृपते स्वं राज्यं प्राप्स्यते भवान्॥ (691)

21. हत्वा रिपूनस्खलितं तव तत्र भविष्यति॥ (692)

22. मृतश्च भूयः सम्प्राप्य जन्म देवाद्विवस्वतः॥ (693)

23. सावर्णिको नाम मनुर्भवान् भुवि भविष्यति॥ (694)

24. वैश्यवर्य त्वया यश्च वरोऽस्मत्तोऽभिवाञ्छितः॥ (695)

25. तं प्रयच्छामि संसिद्ध्यै तव ज्ञानं भविष्यति॥ (696)

26. मार्कण्डेय उवाच॥ (697)

27. इति दत्वा तयोर्देवी यथाऽभिलषितं वरं॥ (698)

28. बभूवाऽन्तर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता ।
एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः॥ (699)

29. सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ।
सावर्णिर्भविता मनुः । क्लीं ॐ ॥ (700)

सत्यास्सन्तु यजमानस्य कामाः

ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः
नमः प्रकृत्यै भद्रायै नियताः प्रणतास्मताम् ।

साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
**श्रीमहात्रिपुर सुन्दर्यैं श्रीविद्यायै** नमः ॥

*****

# ॥ उत्तराङ्गम् ॥

## अङ्गन्यासः

ॐ खङ्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ।

शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा। हृदयाय नमः।

ॐ शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।

घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च। शिरसे स्वाहा ।

ॐ प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ।

भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि । शिखायै वषट्।

ॐ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्तिते

यानि चात्यर्थघोराणि तैः रक्षास्मांस्तथा भुवम् । कवचाय हुं।

ॐ खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ।

करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः । नेत्रत्रयाय वौषट्।

ॐ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।

भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोस्तुते । अस्त्राय फट्।

ॐ भूर्भुवस्सुवरोमिति दिग्विमोकः ।

### ध्यानम्

ॐ विद्युद्दामसमप्रभां मृगपतिस्कंधस्थितां भीषणां

कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम्

हस्तैश्चक्रगदासिखेटविशिखांश्चापं गुणं तर्जनीं

बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ॥

लं-इत्यादि पञ्चपूजा ॥

# ॥ मातृकाऽक्षरसहित नवाक्षरीमहामन्त्र जपः ॥

| | | |
|---|---|---|
| 1 | अं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 2 | आं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 3 | इं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 4 | ईं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 5 | उं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 6 | ऊं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 7 | ऋं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 8 | ॠं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 9 | ऌं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 10 | ॡं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 11 | एं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 12 | ऐं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 13 | ओं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 14 | औं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 15 | अं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 16 | अः | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 17 | कं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 18 | खं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 19 | गं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 20 | घं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 21 | ङं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 22 | चं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 23 | छं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 24 | जं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 25 | झं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 26 | ञं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 27 | टं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 28 | ठं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 29 | डं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 30 | ढं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 31 | णं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 32 | तं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 33 | थं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 34 | दं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 35 | धं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 36 | नं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 37 | पं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 38 | फं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 39 | बं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 40 | भं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 41 | मं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 42 | यं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 43 | रं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 44 | लं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 45 | वं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 46 | शं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 47 | षं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 48 | सं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 49 | हं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |
| 50 | ळं | ऐं ह्रीं क्लीं चामुण्डायै विच्चे |

**क्षं**

51 ऐं ह्रीं क्लीं चामुण्डायै विच्चे ळं
52 ऐं ह्रीं क्लीं चामुण्डायै विच्चे हं
53 ऐं ह्रीं क्लीं चामुण्डायै विच्चे सं
54 ऐं ह्रीं क्लीं चामुण्डायै विच्चे षं
55 ऐं ह्रीं क्लीं चामुण्डायै विच्चे शं
56 ऐं ह्रीं क्लीं चामुण्डायै विच्चे वं
57 ऐं ह्रीं क्लीं चामुण्डायै विच्चे लं
58 ऐं ह्रीं क्लीं चामुण्डायै विच्चे रं
59 ऐं ह्रीं क्लीं चामुण्डायै विच्चे यं
60 ऐं ह्रीं क्लीं चामुण्डायै विच्चे मं
61 ऐं ह्रीं क्लीं चामुण्डायै विच्चे भं
62 ऐं ह्रीं क्लीं चामुण्डायै विच्चे बं
63 ऐं ह्रीं क्लीं चामुण्डायै विच्चे फं
64 ऐं ह्रीं क्लीं चामुण्डायै विच्चे पं
65 ऐं ह्रीं क्लीं चामुण्डायै विच्चे नं
66 ऐं ह्रीं क्लीं चामुण्डायै विच्चे धं
67 ऐं ह्रीं क्लीं चामुण्डायै विच्चे दं
68 ऐं ह्रीं क्लीं चामुण्डायै विच्चे थं
69 ऐं ह्रीं क्लीं चामुण्डायै विच्चे तं
70 ऐं ह्रीं क्लीं चामुण्डायै विच्चे णं
71 ऐं ह्रीं क्लीं चामुण्डायै विच्चे ढं
72 ऐं ह्रीं क्लीं चामुण्डायै विच्चे डं
73 ऐं ह्रीं क्लीं चामुण्डायै विच्चे ठं
74 ऐं ह्रीं क्लीं चामुण्डायै विच्चे टं
75 ऐं ह्रीं क्लीं चामुण्डायै विच्चे ञं
76 ऐं ह्रीं क्लीं चामुण्डायै विच्चे झं
77 ऐं ह्रीं क्लीं चामुण्डायै विच्चे जं
78 ऐं ह्रीं क्लीं चामुण्डायै विच्चे छं
79 ऐं ह्रीं क्लीं चामुण्डायै विच्चे चं
80 ऐं ह्रीं क्लीं चामुण्डायै विच्चे ङं
81 ऐं ह्रीं क्लीं चामुण्डायै विच्चे घं
82 ऐं ह्रीं क्लीं चामुण्डायै विच्चे गं
83 ऐं ह्रीं क्लीं चामुण्डायै विच्चे खं
84 ऐं ह्रीं क्लीं चामुण्डायै विच्चे कं
85 ऐं ह्रीं क्लीं चामुण्डायै विच्चे अः
86 ऐं ह्रीं क्लीं चामुण्डायै विच्चे अं
87 ऐं ह्रीं क्लीं चामुण्डायै विच्चे औं
88 ऐं ह्रीं क्लीं चामुण्डायै विच्चे ओं
89 ऐं ह्रीं क्लीं चामुण्डायै विच्चे ऐं
90 ऐं ह्रीं क्लीं चामुण्डायै विच्चे एं
91 ऐं ह्रीं क्लीं चामुण्डायै विच्चे ॡं
92 ऐं ह्रीं क्लीं चामुण्डायै विच्चे ऌं
93 ऐं ह्रीं क्लीं चामुण्डायै विच्चे ॠं
94 ऐं ह्रीं क्लीं चामुण्डायै विच्चे ऋं
95 ऐं ह्रीं क्लीं चामुण्डायै विच्चे ऊं
96 ऐं ह्रीं क्लीं चामुण्डायै विच्चे उं
97 ऐं ह्रीं क्लीं चामुण्डायै विच्चे ईं
98 ऐं ह्रीं क्लीं चामुण्डायै विच्चे इं
99 ऐं ह्रीं क्लीं चामुण्डायै विच्चे आं
100 ऐं ह्रीं क्लीं चामुण्डायै विच्चे अं
101 अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः ऐं ह्रीं क्लीं चामुण्डायै विच्चे
102 कं खं गं घं ङं ऐं ह्रीं क्लीं चामुण्डायै विच्चे
103 चं छं जं झं ञं ऐं ह्रीं क्लीं चामुण्डायै विच्चे
104 टं ठं डं ढं णं ऐं ह्रीं क्लीं चामुण्डायै विच्चे
105 तं थं दं धं नं ऐं ह्रीं क्लीं चामुण्डायै विच्चे
106 पं फं बं भं मं ऐं ह्रीं क्लीं चामुण्डायै विच्चे
107 यं रं लं वं ऐं ह्रीं क्लीं चामुण्डायै विच्चे
108 शं षं सं हं ळं क्षं ऐं ह्रीं क्लीं चामुण्डायै विच्चे

## अङ्गन्यासः

### हृदयादिन्यासः

| | |
|---|---|
| ऐं | हृदयाय नमः |
| ह्रीं | शिरसे स्वाहा |
| क्लीं | शिखायै वषट् |
| चामुण्डायै | कवचाय हुं |
| विच्चे | नेत्रत्रयाय वौषट् |

ऐं ह्रीं क्लीं चामुण्डायै विच्चे अस्त्राय फट्

भूर्भुवस्सुवरोमिति दिग्विमोकः ।

### ध्यानम्

खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुण्डीं शिरः
शङ्खं सन्दधतीं करैस्त्रिनयनां सर्वाङ्ग-भूषावृताम् ।
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां
यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम्॥

अक्षस्त्रक्परशुं गदेषुकुलिशं पद्मं धनुः कुण्डिकां
दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम् ।
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रसन्नाननां
सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥

घण्टाशूलहलानि शङ्खमुसले चक्रं धनुः सायकं
हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभां ।
गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महा-
पूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीं॥

<u>पञ्चपूजा</u>

| | | | |
|---|---|---|---|
| लं पृथिव्यात्मने | गन्धं कल्पयामि | रं अग्न्यात्मने | दीपं कल्पयामि |
| हं आकाशात्मने | पुष्पं कल्पयामि | वं अमृतात्मने | अमृतं कल्पयामि |
| यं वायवात्मने | धूपं कल्पयामि | सं सर्वात्मने | सर्वोपचारान् समर्पयामि |

*****

# ॥ तन्त्रोक्तं देवी सूक्तम् ॥

1. नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्॥

2. रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः।
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः॥

3. कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुर्मो नमो नमः।
नैर्ऋत्यै भूभृतां लक्ष्मै शर्वाण्यै ते नमो नमः॥

4. दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै।
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः॥

5. अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः।
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः॥

6. यादेवी सर्वभूतेषु विष्णुमायेति शब्दिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥

7. यादेवी सर्वभूतेषु चेतनेत्यभिधीयते।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥

8. यादेवी सर्वभूतेषु बुद्धिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥

9. यादेवी सर्वभूतेषु निद्रारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥

10. यादेवी सर्वभूतेषु क्षुधारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥

11. यादेवी सर्वभूतेषु छायारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥

12. यादेवी सर्वभूतेषु शक्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥

13. यादेवी सर्वभूतेषु तृष्णारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥

14. यादेवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥

15. यादेवी सर्वभूतेषु जातिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥

16. यादेवी सर्वभूतेषु लज्जारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यैनमो नमः॥

17. यादेवी सर्वभूतेषु शान्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥

18. यादेवी सर्वभूतेषु श्रद्धारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥

19. यादेवी सर्वभूतेषु कान्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥

20. यादेवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥

21. यादेवी सर्वभूतेषु वृत्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥

22. यादेवी सर्वभूतेषु स्मृतिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥

23. यादेवी सर्वभूतेषु दयारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥

24. यादेवी सर्वभूतेषु तुष्टिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥

25. यादेवी सर्वभूतेषु मातृरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥

26. यादेवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥

27. इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या।
भूतेषु सततं तस्यै व्याप्तिदेव्यै नमो नमः॥

28. चितिरूपेण या कृत्स्नमेतद् व्याप्य स्थिता जगत्।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥

29. स्तुता सुरैः पूर्वमभीष्टसंश्रयात्
तथा सुरेन्द्रेण दिनेषु सेविता ।
करोतु सा नः शुभहेतुरीश्वरी
शुभानि भद्राण्यभिहन्तु चापदः॥

30. या साम्प्रतं चोद्धतदैत्यतापितै

रस्माभिरीशा च सुरैर्नमस्यते ।

या च स्मृता तत्क्षणमेव हन्ति नः

सर्वापदो भक्तिविनम्रमूर्तिभिः ॥

*****

# ॥ रहस्य त्रयम् ॥

## प्राधानिक रहस्यम्

अस्य श्री सप्तशती रहस्य त्रयस्य । नारायण ऋषिः । अनुष्टुप् छन्दः । श्री महाकालीमहालक्ष्मीमहासरस्वत्यो देवताः । यथोक्त फलावाप्यर्थें जपे (पाठे) विनियोगः ।

राजोवाच

1. भगवन्नवतारा मे चण्डिकायास्त्वयोदिताः।
एतेषां प्रकृतिं ब्रह्मन् प्रधानं वक्तु मर्हसि॥

2. आराध्यं यन्मया देव्याः स्वरूपं येन च द्विज ।
विधिना ब्रूहि सकलं यथावत् प्रणतस्य मे॥

॥ऋषि रुवाच॥

3. इदं रहस्यं परम मनाख्येयं प्रचक्षते।
भक्तोसीति न मे किञ्चित्तवावाच्यं नराधिप॥

4. सर्वस्याद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी।
लक्ष्यालक्ष्यस्वरूपा सा व्याप्य कृत्स्नं व्यवस्थिता॥

5. मातुलुङ्गं गदां खेटं पानपात्रं च बिभ्रती।
नागं लिङ्गं च योनिं च बिभ्रती नृप मूर्धनि॥

6. तप्तकाञ्चनवर्णाभा तप्तकाञ्चनभूषणा।
शून्यं तदखिलं स्वेन पूरयामास तेजसा॥

7. शून्यं तदखिलं लोकं विलोक्य परमेश्वरी।
बभार परमं रूपं तमसा केवलेन हि॥

8. सा भिन्नाञ्जनसंकाशा दंष्ट्राङ्कितवरानना।
विशाललोचनानारी बभूव तनुमध्यमा॥

9. खड्गपात्रशिरः खेटैरलङ्कृत चतुर्भुजा।
कबन्धहारं शिरसा बिभ्राणा हि शिरःस्रजम्॥

10. सा प्रोवाच महालक्ष्मीं तामसी प्रमदोत्तमा।
नाम कर्म च मे मातर्देहि तुभ्यं नमोनमः॥

11. तां प्रोवाच महालक्ष्मीः तामसीं प्रमदोत्तमाम्।
ददामि तव नामानि यानि कर्माणि तानि ते॥

12. महामाया महाकाली महामारी क्षुधा तृषा।
निद्रा तृष्णा चैकवीरा कालरात्रिर्दुरत्यया॥

13. इमानि तव नामानि प्रति पाद्यानि कर्मभिः।
एभिः कर्माणि ते ज्ञात्वा योऽधीते सोऽश्नुते सुखम्॥

14. तामित्युक्त्वा महालक्ष्मीः स्वरूप मपरं नृप।
सत्त्वाख्येनातिशुद्धेन गुणेनेन्दुप्रभं ददौ॥

15. अक्षमालाङ्कुशधरा वीणापुस्तकधारिणी।
सा बभूव वरा नारी नामान्यस्यै च सा ददौ॥

16. महाविद्या महावाणी भारती वाक् सरस्वती।
आर्या ब्राह्मी कामधेनुर्वेदगर्भा च धीश्वरी॥

17. अथोवाच महालक्ष्मीर्महाकालीं सरस्वतीं।
युवां जनयतां देव्यौ मिथुने स्वानुरूपतः॥

18. इत्युक्त्वा ते महालक्ष्मीः ससर्ज मिथुनं स्वयम्।
हिरण्यगर्भौ रुचिरौ स्त्रीपुंसौ कमलासनौ॥

19. ब्रह्मन् विधे विरिञ्चेति धात रित्याह तं नरं।
श्रीः पद्मे कमले लक्ष्मीत्याह माता च तां स्त्रियम्॥

20. महाकाली भारती च मिथुने सृजतः सह।
एतयो रपि रूपाणि नामानि च वदामि ते॥

21. नीलकण्ठं रक्तबाहुं श्वेताङ्गं चन्द्रशेखरम्।
जनयामास पुरुषं महाकाली सितां स्त्रियम्॥

22. स रुद्रः शङ्करः स्थाणुः कपर्दी च त्रिलोचनः।
त्रयी विद्या कामधेनुः सा स्त्री भाषाक्षरा स्वरा॥

23. सरस्वती स्त्रियं गौरीं कृष्णं च पुरुषं नृप।
जनयामास नामानि तयोरपि वदामिते॥

24. विष्णुः कृष्णो हृषीकेशो वासुदेवो जनार्दनः।
उमा गौरी सती चण्डी सुंदरी सुभगा शिवा॥

25. एवं युवतयः सद्यः पुरुषत्वं प्रपेदिरे।
चक्षुष्मन्तो नु पश्यन्ति नेतरेऽतद्विदो जनाः ।।

26. ब्रह्मणे प्रददौ पत्नीं महालक्ष्मी र्नृप त्रयीम्।
रुद्राय गौरीं वरदां वासुदेवाय च श्रियम्॥

27. स्वरया सह संभूय विरिञ्चोऽण्ड मजीजनत्।
बिभेद भगवान् रुद्रस्तद् गौर्या सह वीर्यवान्॥

28. अण्डमध्ये प्रधानादि कार्यजात मभून्नृप ।
महाभूतात्मकं सर्वं जगत् स्थावरजङ्गमम्॥

29. पुपोष पालयामास तल्लक्ष्म्या सह केशवः।
सञ्जहार जगत्सर्वं सह गौर्या महेश्वरः॥

30. महालक्ष्मीर्महाराज सर्वसत्त्वमयीश्वरी।
निराकारा च साकारा सैव नानाऽभिधानभृत्॥

31. नामान्तरैर्निरूप्यैषा नाम्ना नान्येन केनचित्॥

इति श्री मार्कण्डेय पुराणे प्राधानिक रहस्यं समाप्तम्

*****

## ॥ वैकृतिक रहस्यम् ॥

॥ऋषि रुवाच॥

1. ओं त्रिगुणा तामसी देवी सात्त्विकी या त्रिधोदिता।
सा शर्वा चण्डिका दुर्गा भद्रा भगवतीर्यते ॥

2. योगनिद्रा हरेरुक्ता महाकाली तमोगुणा।
मधुकैटभनाशार्थं यां तुष्टावांबुजासनः॥

3. दशवक्त्रा दशभुजा दशपादाञ्जनप्रभा।
विशालया राजमाना त्रिंशल्लोचनमालया॥

4. स्फुरद्दशनदंष्ट्रा सा भीमरूपाऽपि भूमिप।
रूपसौभाग्यकान्तीनां सा प्रतिष्ठा महाश्रियः॥

5. खड्गबाणगदाशूलचक्रशङ्खभुशुण्डिभृत्।
परिघं कार्मुकं शीर्षं निश्च्योतद्रुधिरं दधौ॥

6. एषा सा वैष्णवी माया महाकाली दुरत्यया।
आराधिता वशीकुर्यात् पूजाकर्तुश्चराचरम् ॥

7. सर्वदेवशरीरेभ्यो याऽऽविर्भूताऽमितप्रभा।
त्रिगुणा सा महालक्ष्मीः साक्षान्महिषमर्दिनी ॥

8. श्वेतानना नीलभुजा सुश्वेतस्तनमण्डला।
रक्तमध्या रक्तपादा नील जंघोरुरुन्मदा ॥

9. सुचित्रजघना चित्रमाल्याम्बरविभूषणा।
चित्रानुलेपना कान्तिरूपसौभाग्यशालिनी ॥

10. अष्टादशभुजा पूज्या सा सहस्रभुजा सती।
आयुधान्यत्र वक्ष्यंते दक्षिणाधःकरक्रमात् ॥

11. अक्षमाला च कमलं बाणोऽसिः कुलिशं गदा।
चक्रं त्रिशूलं परशुः शंखो घण्टा च पाशकः ॥

12. शक्तिर्दण्डश्चर्म चापं पानपात्रं कमण्डलुः।
अलंकृतभुजामेभिरायुधैः कमलासनाम् ॥

13. सर्वदेवमयीमीशांमहालक्ष्मी मिमां नृप।
पूजयेत् सर्वलोकानां स देवानं प्रभुर्भवेत् ॥

14. गौरीदेहात् समुद्भूता या सत्त्वैकगुणाश्रया।
साक्षात् सरस्वती प्रोक्ता शुम्भासुरनिबर्हिणी ॥

15. दधौ चाष्टभुजा बाणमुसले शूलचक्रभृत्।
शङ्खं घण्टां लाङ्गलं च कार्मुकं वसुधाधिप ॥

16. एषा सम्पूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति।
निशुम्भमथिनी देवी शुम्भासुरनिबर्हिणी॥

17. इत्युक्तानि स्वरूपाणि मूर्तीनां तव पार्थिव।
उपासनं जगन्मातुः पृथगासां निशामय॥

18. महालक्ष्मीर्यदा पूज्या महाकाली सरस्वती।
दक्षिणोत्तरयोः पूज्ये पृष्ठतो मिथुनत्रयम्॥

19. विरिंचिः स्वरया मध्ये रुद्रो गौर्या च दक्षिणे।
वामे लक्ष्म्या हृषीकेशः पुरतो देवतात्रयम्॥

20. अष्टादशभुजा मध्ये वामे चास्या दशानना।
दक्षिणेऽष्टभुजा लक्ष्मीर्महतीति समर्चयेत् ॥

21. अष्टादशभुजा चैषा यदा पूज्या नराधिप।
दशानना चाष्टभुजा दक्षिणोत्तरयोस्तदा ॥

22. कालमृत्यू च सम्पूज्यौ सर्वारिष्टप्रशान्तये।
यदा चाष्टभुजा पूज्या शुम्भासुरनिबर्हिणी॥

23. नवास्याः शक्तयः पूज्यास्तदा रुद्रविनायकौ।
नमो देव्या इति स्तोत्रैर्महालक्ष्मीं समर्चयेत्॥

24. अवतारत्रयार्चायां स्तोत्रमन्त्रास्तदाश्रयाः।
अष्टादशभुजा चैषा पूज्यामहिषमर्दिनी ॥

25. महालक्ष्मीर्महाकाली सैव प्रोक्ता सरस्वती।
ईश्वरी पुण्यपापानां सर्वलोकमहेश्वरी॥

26. महिषान्तकरी येन पूजिता स जगत्प्रभुः।
पूजयेज्जगतां धात्रीं चण्डिकां भक्तवत्सलाम्॥

27. अर्घ्यादिभिरलङ्कारैर्गन्ध पुष्पैस्तथाऽक्षतैः।
धूपैर्दीपैश्च नैवेद्यैर् नानाभक्ष्य समन्वितैः ॥

28. रुधिराक्तेन बलिना मांसेन सुरयानृप।
प्रणामाचमनीयेन चन्दनेन सुगन्धिना॥

29. सकर्पूरैश्च ताम्बूलैर्भक्तिभावसमन्वितैः।
वामभागेऽग्रतो देव्याश्छिन्नशीर्षं महाऽसुरम्॥

30. पूजयेन्महिषं येन प्राप्तं सायुज्यमीशया।
दक्षिणे पुरतः सिंहं समग्रं धर्म मीश्वरम्॥

31. वाहनं पूजयेद् देव्या धृतं येन चराचरम्।
कुर्याच्च स्तवनं धीमांस्तस्या एकाग्रमानसः॥

32. ततः कृताञ्जलिर्भूत्वा स्तुवीत चरितैरिमैः।
एकेन वा मध्यमेन नैकें नेतरयोरिह॥

33. चरितार्धं तु न जपेज्जपञ्छिद्रमवाप्नुयात्।
प्रदक्षिणानमस्कारान् कृत्वा मूर्ध्नि कृतांजलिः॥

34. क्षमापयेज्जगद्धात्रीं मुहुर्मुहुरतंद्रितः।
प्रतिश्लोकं च जुहुयात् पायसं तिलसर्पिषा॥

35. जुहुयात् स्तोत्रमन्त्रैर्वा चण्डिकायै शुभं हविः।
भूयोनाम पदैर्देवीं पूजयेत् सुसमाहितः॥

36. प्रयतः प्रांजलिः प्रह्वः प्रणम्यारोप्य चात्मनि।
सुचिरं भावयेदीशां चण्डिकां तन्मयो भवेत्॥

37. एवं यः पूजयेद्भक्त्या प्रत्यहं परमेश्वरीम्।
भुक्त्वा भोगान् यथाकामं देवीसायुज्यमाप्नुयात्॥

38. यो न पूज यते नित्यं चण्डिकां भक्तवत्सलाम्।
भस्मीकृत्यास्य पुण्यानि निर्दहेत् परमेश्वरी ॥

39. तस्मात् पूजय भूपाल सर्वलोकमहेश्वरीम्।
यथोक्तेन विधानेन चण्डिकां सुखमाप्स्यसि॥

इति श्री मार्कण्डेय पुराणे वैकृतिक रहस्यं समाप्तम्

*****

# ॥ मूर्ति रहस्यम् ॥

॥ ऋषि रुवाच ॥

1. ॐ नन्दा भगवती नाम या भविष्यति नन्दजा।
स्तुता सा पूजिता भक्त्या वशीकुर्याज्जगत्त्रयम्॥

2. कनकोत्तमकान्तिः सा सुकान्तिकनकाम्बरा।
देवी कनकवर्णाभा कनकोत्तमभूषणा॥

3. कमलाङ्कुशपाशाब्जैरलङ्कृतचतुर्भुजा।
इन्दिरा कमला लक्ष्मीः सा श्री रुक्मांबुजाऽऽसना॥

4. या रक्तदन्तिका नाम देवी प्रोक्ता मयाऽनघ।
तस्याः स्वरूपं वक्ष्यामि शृणु सर्वभयापहम्॥

5. रक्ताम्बरा रक्तवर्णा रक्तसर्वाङ्गभूषणा।
रक्तायुधा रक्तनेत्रा रक्तकेशातिभीषणा॥

6. रक्ततीक्ष्णनखा रक्तदशना रक्तदन्तिका।
पतिं नारीवानुरक्ता देवीभक्तं भजेज्जनम्॥

7. वसुधेव विशाला सा सुमेरु युगलस्तनी।
दीर्घौ लम्बावतिस्थूलौ तावतीवमनोहरौ॥

8. कर्कशावतिकान्तौ तौ सर्वानन्दपयोनिधी।
भक्तान् संपाययेद् देवी सर्वकामदुघौ स्तनौ॥

9. खड्गं पात्रं च मुसलं लाङ्गलं च बिभर्ति सा।
आख्याता रक्तचामुण्डा देवी योगेश्वरीति च॥

10. अनया व्याप्त मखिलं जगत्स्थावरजङ्गमम्।
इमां यः पूजयेद्भक्त्या स व्याप्नोति चराचरम्॥

11. अधीते य इमं नित्यं रक्तदन्त्या वपुःस्तवम्।
तं सा परिचरेद्देवी पतिं प्रियमिवाङ्गना॥

12. शाकम्भरी नीलवर्णा नीलोत्पलविलोचना।
गम्भीर नाभिस्त्रिवलीविभूषिततनूदरी॥

13. सुकर्कशसमोत्तुङ्गवृत्तपीनघनस्तनी।
मुष्टिं शिलीमुखापूर्णं कमलं कमलालया॥

14. पुष्पपल्लवमूलादि फलाढ्यं शाकसञ्चयम्।
काम्यानन्तर सैर्युक्तं क्षुत्तृण्मृत्युभयापहम्॥

15. कार्मुकं च स्फुरत्कान्ति बिभ्रती परमेश्वरी।
शाकम्भरी शताक्षी सा सैव दुर्गा प्रकीर्तिता॥

16. विशोका दुष्टदमनी शमनी दुरितापदाम्।
उमा गौरी सती चण्डी कालिका सा च पार्वती॥

17. शाकम्भरीं स्तुवन् ध्यायञ्जपन् सम्पूजयन्नमन्।
अक्षय्यमश्नुते शीघ्रमन्नपानामृतं फलम्॥

18. भीमाऽपि नीलवर्णासा दंष्ट्रादशनभासुरा।
विशाललोचना नारी वृत्तपीनपयोधरा॥

19. चन्द्रहासं च डमरुं शिरः पात्रं च बिभ्रती।
एकवीरा कालरात्रिः सैवोक्ता कामदा स्तुता॥

20. तेजोमण्डल दुर्धर्षा भ्रामरी चित्रकान्तिभृत्।
चित्रानुलेपना देवी चित्रादाभरणभूषिता॥

21. चित्रभ्रमरपाणिः सा महामारीति गीयते।
इत्येता मूर्तयो देव्या याः ख्याता वसुधाधिप॥

22. जगन्मातुश्चण्डिकायाः कीर्तिताः कामधेनवः।
इदं रहस्यं परमं न वाच्यं कस्यचित्त्वया॥

23. व्याख्यानं दिव्यमूर्तीनामभीष्टफलदायकम्।
तस्मात् सर्वप्रयत्नेन देवीं जप निरंतरम्॥

24. सप्तजन्मार्जितैर्घोरैर्ब्रह्महत्यासमैरपि।
पाठमात्रेण मन्त्राणां मुच्यते सर्वकिल्बिषैः॥

25. देव्या ध्यानं मया ख्यातं गुह्याद् गुह्यतरं महत्।
तस्मात् सर्वं प्रयत्नेन सर्वकामफलप्रदम्॥

26. सर्वरूपमयी देवी सर्वं देवीमयं जगत्।
अतोऽहं विश्वरूपां तां नमामि परमेश्वरीम्॥

इति मार्खण्डेय पुराणे मूर्ति रहस्यं समाप्तम्

*****

# ॥ कर्पूरनीराजनम् ॥

ओं राजाधि राजाय प्रसह्य साहिने ।

नमो वयं वैश्रवणाय कुर्महे ।

स मे कामान्काम कामायमह्यम् ।

कामेश्वरो वैश्रवणो ददातु ।

कुबेराय वैश्रवणाय महाराजाय नमः ॥

*****

## ॥ मन्त्रपुष्पम् ॥

योऽपां पुष्पं वेद । पुष्पवान् प्रजावान् पशुमान् भवति ।

चन्द्रमा वा अपां पुष्पम् । पुष्पवान् प्रजावान् पशुमान् भवति ।

य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ॥

देवीं वाच मजन यंत देवाः तां विश्वरूपाः पशवो वदंति ।

सा नो मन्द्रेष मूर्जं दुहाना धेनुर्वागस्मानुपसुष्ठुतैतु ॥

यद्वाग्वदन्त्यविचेतनानि । राष्ट्री देवानां निषसाद मन्द्रा ।

चतस्र ऊर्जं दुदुहे पयांग्ंसि । क्व स्विदस्याः परमं जगाम ।

गौरी मिमाय सलिलानि तक्ष त्येकपदी द्विपदी सा चतुष्पदी ।

अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ॥

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।

ईश्वरीग्ं सर्व भूतानां तामिहोपह्वये श्रियम् ॥

**शिवे शिव सुशीतलामृत तरङ्ग गंधोल्लस न्नवावरण देवते नव नवामृतस्यन्दिनी ।**

**गुरुक्रम पुरस्कृते गुण शरीर नित्योज्ज्वले षडङ्ग परिवारिते कलित एष**

**पुष्पांजलिः ॥**

## ॥ प्रदक्षिणमन्त्राः ॥

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥

प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरी ॥

सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ।
यानि चात्यर्थघोराणि तैः रक्षास्मांस्तथा भुवम् ॥

खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ।
करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः ॥

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मतां ॥

साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै श्री महात्रिपुर सुंदर्यैनमः
चण्डिकापरमेश्वर्यै नमः
वेदोक्त मन्त्र पुष्पा जलिं समर्पयामि ॥

## ॥ नमस्कारमन्त्राः ॥

नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म तां ॥

रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ।
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः ॥

कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुर्मो नमो नमः ।
नैर्ऋत्यै भूभृतां लक्ष्मै शर्वाण्यै ते नमो नमः ॥

दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ।
ख्यात्यै तथैव कृष्णायै धूम्रायै सततंनमः ॥

अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः ।
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥

## ॥ प्रार्थनमन्त्राः ॥

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥

शरणागतदीनार्तपरित्राणपरायणे ।
सर्वस्यार्तिहरेदेवि नारायणि नमोऽस्तु ते ॥

सर्व स्वरूपे सर्वेशे सर्व शक्ति समन्विते ।
भयेभ्यस् त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥

एतत् ते वदनं सौम्यं लोचनत्रयभूषितम् ।
पातु नः सर्वभीतिभ्यः कात्यायिनि नमोऽस्तु ते ॥

ज्वालाकरालमत्युग्रमशेषासुरसूदनम् ।
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते ॥

हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ।
सा घण्टा पातु नो देवि पापेभ्योऽनःसुतानिव ॥

असुरासृग्वसापङ्कचर्चितस्ते करोज्वलः ।
शुभाय खड्गो भवतु चण्डिके त्वां नता वयम् ॥

रोगानशेषानपहंसि तुष्टा,

रुष्टा तु कामान् सकलानभीष्टान् ।

त्वामाश्रितानां न विपन्नराणां,

त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥

सर्वाबाधा प्रशमनं त्रैलोक्यस्याखिलेश्वरि ।

एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥

आयुर्देहि धनं देहि विद्यां देहि महेश्वरि ।

समस्त मखिलं देहि देहि मे परमेश्वरि ॥

रूपं देहि यशो देहि भगं देहि भगवति ।

पुत्रान् देहि धनं देहि सर्व कामांश्च देहिमे ॥

महिषघ्नि महामाये चामुण्डे मुण्ड मालिनि ।

आयुरारोग्यमैश्वर्यं देहि देवि नमोस्तुते ॥

अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥

इषे त्वोर्जे त्वा वायवस्थो पायवस्थ देवो वः सविता प्रार्पयतु
श्रेष्ठतमाय कर्मणे ॥

अग्न आयाहि वीतये गृणानो हव्यदातये । नि होता सत्सि बर्हिषि ॥

शं नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभिस्रवन्तु नः ॥

**अथातो दर्शपूर्णमासौ व्याख्यास्यामः ।**
**प्रातरग्निं होत्रं हुत्वा अन्यमाहवनीयं प्रणीय अग्नीरन्वादधाति ।**
**न गतश्रियोऽन्यमग्निं प्रणयति ॥**

**आद्यं पुरुषमीशानं पुरुहूतं पुरुष्टुतं ।**
**ऋतमेकाक्षरं ब्रह्म व्यक्ताव्यक्तं सनातनं ॥ हरिः ओं ॥**

*****

# ॥ अपराध क्षमापणा स्तोत्रम् ॥

1. अपराध सहस्राणि क्रियन्तेऽहर्निशं मया।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि॥

2. आवाहनं न जानामि न जानामि विसर्जनम्।
पूजां चैव न जानामि क्षम्यतां परमेश्वरि॥

3. मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि।
यत्पूजितं मया देवि परिपूर्णं तदस्तु मे॥

4. अपराधशतं कृत्वा जगदंबेति चोच्चरेत्।
यां गतिं समवाप्नोति न तां ब्रह्मादयः सुराः॥

5. सापराधोऽस्मि शरणं, प्राप्तस्त्वां जगदम्बिके ॥
इदानीमनुकम्प्योऽहं, यथेच्छसि तथा कुरु॥

6. अज्ञानाद्विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं कृतम्।
तत्सर्वं क्षम्यतां देवि, प्रसीद परमेश्वरि॥

7. कामेश्वरि जगन्मातः, सच्चिदानन्दविग्रहे।
गृहाणार्चामिमां प्रीत्या, प्रसीद परमेश्वरि॥

8. यदक्षरपदभ्रष्टम् मात्राहीनं तु यद्भवेत्।
तत्सर्वं क्षम्यतां देवि नारायणि नमोस्तुते॥

9. विसर्गबिंदुमात्राणि पदपादाक्षराणि च।
न्यूनातिरिक्तान्येतानि क्षमस्व परमेश्वरि॥

10. गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम्।
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि॥

11. सर्वरूपमयी देवी सर्वं देवीमयं जगत्।
अतोहं विश्वरूपां तां नमामि परमेश्वरीं॥

इति अपराध क्षमापण स्तोत्रं समाप्तम्॥

*****

## ॥ भास्कर प्रकाशाश्रम मङ्गलम् ॥

श्री माता श्री माता ह्रीं श्रीं माता ललिताम्बा

श्री माता श्री माता ह्रीं श्रीं माता ललिताम्बा

श्री बाला श्री बाला ऐं क्लीं सौः बालाम्बा

श्री बाला श्री बाला ऐं क्लीं सौः बालाम्बा

कल्याणी कल्याणी ककार रूपा कल्याणी

कल्याणी कल्याणी ककार रूपा कल्याणी

ह्रीङ्कारी ह्रीङ्कारी ह्रीङ्कार पर सौख्यदा

ह्रीङ्कारी ह्रीङ्कारी ह्रीङ्कार पर सौख्यदा

श्री माता श्री माता ह्रीं श्रीं माता ललिताम्बा

श्री राज राजेश्वरी महात्रिपुर सुंदरीं ललिता भट्टारिकां भजेहं भजे

विदेह कैवल्यं आशु एहि देहि मां पाहि श्री राजराजेश्वरीम्

आराधयामि सततं

गं गणपतिम्

सौः शरवणम्

अं आं सौः त्रैलोक्यम्,

ऐं क्लीं सौः सर्वाशां,

ह्रीं क्लीं सौः संक्षोभणम्,

हैं ह्क्लीं ह्सौः सौभाग्यम्,

ह्सैं ह्स्क्रीं ह्स्सौः सर्वार्थं,
ह्रीं क्लीं ब्लें सर्वरक्षां,
ह्रीं श्रीं सौः रोगहरं,
ह्स्रैं(ह्स्रैं) ह्स्क्ल्रीं(ह्स्क्ल्रीं) ह्स्रौः(ह्स्रौः) सर्वसिद्धं,
क ए ई ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं श्रीं सर्वानन्दं
श्री नाथानन्द गुरुपादुकां पूजये सदा
चिदानन्दनाथोहं कामेश्वराङ्क निलयां
वैश्रवण विनुत धनिनीं गणपति गुरुगुह जननीं
निरतिशय शुभमङ्गलां मङ्गलां जय मङ्गलां
श्री राज राजेश्वरीं महात्रिपुरसुंदरीं ललिताभट्टारिकां भजेहं भजे
विदेह कैवल्यम् आशु एहि देहि मां पाहि ॥

सम्पूजकानां परिपालकानां यतेन्द्रियाणां च तपोधनानां
देशस्य राष्ट्रस्य कुलस्यराज्ञां करोतु शांतिं भगवान् कुलेशः
नन्दन्तु साधक कुलान्यणिमादि सिद्धाः
शापाः पतन्तु समयद्विषि योगिनीनां
सा शांभवी स्फुरतु कापि ममाप्यवस्था
यस्यां गुरोश्चरण पङ्कजमेव लभ्यं
शिवाद्यवनि पर्यंतं ब्रह्मादि स्तंभ संयुतं

कालाग्न्यादि शिवांतं च जगद्यज्ञेन तृप्यतु
जगद्यज्ञेन तृप्यतु जगद्यज्ञेन तृप्यतु

देव नाथ गुरो स्वामिन् देशिक स्वात्म नायक
त्राहि त्राहि कृपा सिंधो पूजां पूर्ण तरां कुरु॥

*****

# ॥ महिषासुर मर्दिनी स्तोत्रं ॥

1. अयि गिरिनन्दिनि नन्दितमेदिनि विश्वविनोदिनि नन्दिनुते
गिरिवरविन्ध्य शिरोधिनिवासिनि विष्णुविलासिनि जिष्णुनुते
भगवति हे शितिकन्ठकुटुम्बिनि भूरिकुटुम्बिनि भूरिकृते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

2. सुरवरवर्षिणि दुर्धरधर्षिणि दुर्मुखमर्षिणि हर्षरते
त्रिभुवनपोषिणि शङ्करतोषिणि किल्बिषमोषिणि घोषरते
दनुजनिरोषिणि दितिसुतरोषिणि दुर्मदशोषिणि सिन्धुसुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

3. अयि जगदम्ब मदम्ब कदम्बवनप्रियवासिनि हासरते
शिखरिशिरोमणि तुङ्गहिमालय शृङ्गनिजालय मध्यगते
मधुमधुरे मधुकैटभ भञ्जिनि कैटभभञ्जिनि हासरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

4. अयि शतखण्ड विखण्डितरुण्ड वितुण्डितशुण्ड गजाधिपते
रिपुगजगण्ड विदारणचण्ड पराक्रमशुण्ड मृगाधिपते
निजभुजदण्ड निपातितखण्ड विपातितमुण्ड भटाधिपते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

5. अयि रणदुर्मद शत्रुवधोदित दुर्धरनिर्जर शक्तिभृते
चतुरविचारधुरीण महाशिव दूतकृत प्रमधाधिपते
दुरितदुरीह दुराशयदुर्मति दानवदूतकृतान्तमते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

6. अयि शरणागत वैरिवधूवर वीरवराभय दायकरे
त्रिभुवन मस्तक शूलविरोधि शिरोधिऽकृतामल शूलकरे
दुमिदुमितामर दुंदुभिनाद महो मुखरीकृत तिङ्मकरे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

7. अयि निजहुङ्कृतिमात्र निराकृत धूम्रविलोचन धूम्रशते
समरविशोषित शोणितबीज समुद्भवशोणित बीजलते
शिव शिव शुंभ निशुंभ महाहव तर्पित भूत पिशाचरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

8. धनुरनुषंग रणक्षणसङ्ग परिस्फुरदङ्ग नटत्कटके
कनक पिशंग पृषत्कनिषङ्ग रसद्भट शृंग हताबटुके
कृतचतुरङ्ग बलक्षितिरङ्ग घटद्बहुरंग रटद्बटुके
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

9. सुरललना ततथेयि तथेयि कृताभिनयोदर नृत्यरते
कृत कुकुथः कुकुथो गडदादिकताल कुतूहल गानरते
धुधुकुट धुक्कुट धिंधिमित ध्वनि धीर मृदंग निनादरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

10. जय जय जप्य जये जय शब्द परस्तुति तत्पर विश्वनुते
झण झण झिञ्झिमि झिङ्कृत नूपुर सिञ्जितमोहित भूतपते
नटितनटार्ध नटीनट नायक नाटित नाट्य सुगानरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥
11. अयि सुमनः सुमनः सुमनः सुमनः सुमनोहर कान्तियुते
श्रित रजनी रजनी रजनी रजनी रजनीकर वक्त्रवृते
सुनयन विभ्रमर भ्रमर भ्रमर भ्रमर भ्रमराधिपते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥
12. सहित महाहव मल्लम तल्लिक मल्लित रल्लक मल्लरते
विरचित वल्लिक पल्लिक मल्लिक झिल्लिक भिल्लिक वर्ग वृते
सितकृत फुल्लसमुल्लसितारुण तल्लज पल्लव सल्ललिते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥
13. अविरलगंड गलन्मदमेदुर मत्तमतंगज राजपते
त्रिभुवन भूषण भूतकलानिधि रूपपयोनिधि राजसुते
अयि सुदतीजन लालसमानस मोहनमन्मथ राजसुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥
14. कमलदलामल कोमलकान्ति कलाकलितामल भाललते
सकलविलास कलानिलयक्रम केलिचलत्कल हंसकुले
अलिकुल सङ्कुल कुवलय मण्डल मौलिमिलद्भकुलालि कुले
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

15. करमुरलीरव वीजितकूजित लज्जितकोकिल मञ्जुमते
मिलित पुलिन्द मनोहर गुञ्जित रंजितशैल निकुञ्जगते
निजगुणभूत महाशबरीगण सद्गुणसम्भृत केलितले
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

16. कटितटपीत दुकूलविचित्र मयूखतिरस्कृत चन्द्ररुचे
प्रणतसुरासुर मौलिमणिस्फुर दंशुलसन्नख चन्द्ररुचे
जितकनकाचल मौलिपदोर्जित निर्भरकुञ्जर कुंभकुचे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

17. विजित सहस्रकरैक सहस्रकरैक सहस्रकरैकनुते
कृत सुरतारक सङ्गरतारक संगरतारक सूनुसुते
सुरथसमाधि समानसमाधि समाधिसमाधि सुजातरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

18. पदकमलं करुणानिलये वरिवस्यति योनुदिनं सुशिवे
अयि कमले कमलानिलये कमलानिलयः स कथं न भवेत्
तव पदमेव परंपदमित्यनुशीलयतो मम किं न शिवे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

19. कनकलसत्कल सिंधुजलैरनु षिञ्चति तेगुण रङ्गभुवं
भजति स किं न शचीकुचकुंभ तटीपरिरंभ सुखानुभवम्
तव चरणं शरणं करवाणि नतामरवाणि निवासि शिवं
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

20. तव विमलेंदुकुलं वदनेंदुमलं सकलं ननु कूलयते
किमु पुरुहूत पुरींदुमुखी सुमुखीभिरसौ विमुखीक्रियते
मम तु मतं शिवनामधने भवती कृपया किमुत क्रियते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

21. अयि मयि दीन दयालुतया कृपयैव त्वया भवितव्यमुमे
अयि जगतो जननी कृपयासि यथासि तथानुमितासिरते
यदुचितमत्र भवत्युररि कुरुता दुरुता पमपाकुरुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

*****

# ॥ देवीवैभवाश्चर्याष्टोत्तरशतदिव्यनामस्तोत्रम् ॥

अस्य श्री देवी-वैभव-आश्चर्य-अष्टोत्तर-शत दिव्यनाम-स्तोत्र-महामन्त्रस्य। आनन्द भैरव ऋषिः। अनुष्टुप् छन्दः। आनन्दभैरवी श्रीमहा त्रिपुर सुन्दरी देवता। कूट त्रयेण बीज-शक्ति-कीलकम्। मम श्री आनन्द भैरवी श्रीमहा त्रिपुर सुन्दरी प्रसाद-सिद्ध्यर्थे सान्निध्यसिद्ध्यर्थे जपे विनियोगः।

***कूटत्रयेण कर-षडङ्गन्यासः।***

भूर्भुवःसुवरोमिति दिग्बन्धः॥

## ध्यानम्

कुङ्कुम पङ्क समाभां अङ्कुश पाशेक्षु कोदण्ड शराम्
पङ्कज मध्य निषण्णाम् पङ्केरुह लोचनाम् पराम् वन्दे ॥

। पञ्चपूजा ।

ॐ ऐं ह्रीं श्रीं

1. परमानन्द-लहरी परचैतन्य-दीपिका।
स्वयम्प्रकाश-किरणा नित्य-वैभव-शालिनी॥ (1-4)

2. विशुद्ध-केवलाखण्ड-सत्य-कालात्म-रूपिणी।
आदि-मध्यान्त-रहिता महामाया-विलासिनी॥ (5-7)

3. गुणत्रय-परिच्छेत्री सर्वतत्त्व-प्रकाशिनी।
स्त्रीपुंस-भावरसिका जगत्सर्गादि-लंपटा॥ (8-11)

4. अशेष-नामरूपादि-भेदच्छेद-रविप्रभा।
अनादि-वासना-रूपा वासनोद्यत्-प्रपञ्चिका॥ (12-14)

5. प्रपञ्चोप-शम-प्रौढा चराचर-जगन्मयी।
समस्त-जगदाधारा सर्वसञ्जीव-नोत्सुका॥ (15-18)

6. भक्तचेतो-मयानन्त-स्वार्थ-वैभव-विभ्रमा।
सर्वाकर्षण-वश्यादि-सर्वकर्म-दुरन्धरा॥ (19-20)

7. विज्ञान-परमानन्द-विद्या सन्तान-सिद्धिदा।
आयुरारोग्य-सौभाग्य-बलश्रीकीर्ति-भाग्यदा॥ (21-23)

8. धनधान्य-मणीवस्त्र-भूषालेपन-माल्यदा।
गृहग्राम-महाराज्य-साम्राज्य-सुखदायिनी॥ (24-25)

9. सप्ताङ्ग-शक्ति-सम्पूर्ण-सार्वभौम-फलप्रदा।
ब्रह्म-विष्णु-शिवेन्द्रादि-पद-विश्राण-नक्षमा॥ (26-27)

10. भुक्तिमुक्ति-महाभक्ति-विरक्त्य-द्वैतदायिनी।
निग्रहानु-ग्रहाध्यक्षा ज्ञान-निर्द्वैतदायिनी॥ (28-30)

11. परकाय-प्रवेशादि-योगसिद्धि-प्रदायिनी।

शिष्ट-सञ्जीवन-प्रौढा दुष्ट-सम्हार-सिद्धिदा॥ (31-33)

12. लीला-विनिर्मितानेक-कोटि-ब्रह्माण्डमण्डला।
एका,(अ)ऽनेकात्मिका नानारूपिण्य,(अ)ऽर्धाङ्गनेश्वरी॥ (34-38)

13. शिवशक्तिमयी नित्य-श्रृङ्गारैक-रसप्रिया।
तुष्टा पुष्टा,ऽपरिच्छिन्ना नित्ययौवन-मोहिनी॥ (39-44)

14. समस्त-देवतारूपा सर्वदेवाधि-देवता।
देवर्षि-पितृ-सिद्धादि-योगिनी-भैरवात्मिका॥ (45-47)

15. निधि-सिद्धि-मणी-मुद्रा शस्त्रास्त्रायुध भासुरा।
छत्र-चामर-वादित्र-पताका-व्यजनाञ्चिता॥ (48-50)

16. हस्त्यश्व-रथ-पादाता-अमात्य-सेना-सुसेविता।
पुरोहित कुलाचार्य गुरु शिष्यादि सेविता॥ (51-52)

17. सुधा-समुद्र-मध्योद्य-त्सुरद्रुम-निवासिनी।
मणि-द्वीपान्तर-प्रोद्यत्-कदम्ब-वनवासिनी॥ (53-54)

18. चिन्तामणि-गृहान्तस्था मणि मण्डप मध्यगा।
रत्न-सिम्हासन-प्रोद्य-च्छिवमञ्चाधि-शायिनी॥ (55-57)

19. सदाशिव-महालिङ्ग-मूल-सङ्घट्ट-योनिका।
अन्योन्यालिङ्ग-सङ्घर्ष-कण्डू-सङ्क्षुब्ध-मानसा॥ (58-59)

20. कलोद्यद्बिन्दु-कालिन्य-तुर्यनाद-परम्परा।
नादान्तानन्द-सन्दोह-स्वयं-व्यक्तवचोमृता॥ (60-61)

21. कामराज-महातन्त्र-रहस्याचार-दक्षिणा।
मकार-पञ्चकोद्भूत-प्रौढान्तोल्लास-सुन्दरी॥ (62-63)

22. श्रीचक्रराजनिलया श्रीविद्या-मन्त्रविग्रहा।
अखण्ड-सच्चिदानन्द-शिवशक्त्यैक-रूपिणी॥ (64-66)

23. त्रिपुरा त्रिपुरेशानी महात्रिपुरसुन्दरी।
त्रिपुरावासरसिका त्रिपुराश्रीस्वरूपिणी॥ (67-71)

24. महापद्म-वनान्तस्था श्रीमत्त्रिपुरमालिनी।
महात्रिपुर-सिद्धाम्बा श्रीमहा-त्रिपुराम्बिका॥ (72-75)

25. नवचक्र-क्रमादेवी महात्रिपुरभैरवी।
श्रीमाता ललिता बाला राजराजेश्वरी शिवा॥ (76-82)

26. उत्पत्ति-स्थितिसंहारक्रम-चक्रनिवासिनी।
अर्धमेर्वात्म-चक्रस्था सर्वलोकमहेश्वरी॥ (83-85)

27. वल्मीकपुर-मध्यस्था जम्बूवन-निवासिनी।
अरुणाचल-शृङ्गस्था व्याघ्रालय-निवासिनी॥ (86-89)

28. श्रीकालहस्तिनिलया काशीपुरनिवासिनी।
श्रीमत्कैलासनिलया द्वादशान्तमहेश्वरी॥ (90-93)

29. श्रीषोडशान्तमध्यस्था सर्ववेदान्त-लक्षिता।
श्रुति-स्मृति-पुराणेति-हासागम-कलेश्वरी॥ (94-96)

30. भूतभौतिक-तन्मात्र-देवता-प्राणहृन्मयी।
जीवेश्वर-ब्रह्मरूपा श्रीगुणाढ्या गुणात्मिका॥ (97-100)

31. अवस्थात्रय-निर्मुक्ता वाग्रमोमा-महीमयी।
गायत्री भुवनेशानी-दुर्गा-काल्यादि-रूपिणी॥ (101-103)

32. मत्स्यकूर्म-वराहादि-नानारूप-विलासिनी।
महायोगीश्वरा-राध्या महावीर-वरप्रदा॥ (104-106)

33. सिद्धेश्वर-कुलाराध्या श्रीमच्चरण-वैभवा॥ (107-108)

श्रीं ह्रीं ऐं ओं कूटत्रयेण षडङ्गन्यासः।
भूर्भुवःसुवरोमिति दिग्विमोकः।

## पुनर्ध्यानम्

कुङ्कुम पङ्क समाभां अङ्कुश पाशेक्षु कोदण्ड शराम्
पङ्कज मध्य निषण्णाम् पङ्केरुह लोचनाम् पराम् वन्दे ॥

पुनः पञ्चपूजा ॥

*****

## ॥ श्रीललिता सहस्रनाम स्तोत्रम् ॥

अस्य श्री ललिता सहस्र नाम स्तोत्र महामन्त्रस्य। वशिन्यादि वाग्देवता ऋषयः। अनुष्टुप् छन्दः। श्री ललिता परामेश्वरी देवता। कएईलह्रीं बीजं। हसकहलह्रीं शक्तिः। सकलह्रीं कीलकं। श्री ललिता सहस्रनाम स्तोत्र महामन्त्र जपे विनियोगः॥

| | *करन्यासम्* | *अङ्गन्यासम्* |
|---|---|---|
| क ए ई ल ह्रीं | अङ्गुष्ठाभ्यां नमः | हृदयाय नमः |
| ह स क ह ल ह्रीं | तर्जनीभ्यां नमः | शिरसे स्वाहा नमः |
| स क ल ह्रीं | मध्यमाभ्यां नमः | शिखायै वषट् |
| क ए ई ल ह्रीं | अनामिकाभ्यां नमः | कवचाय हुं |
| ह स क ह ल ह्रीं | कनिष्ठिकाभ्यां नमः | नेत्रत्रयाय वौषट् |
| स क ल ह्रीं | करतलकर पृष्ठाभ्यां नमः | अस्त्राय फट् |
| भूर्भुवस्सुवरोमिति | दिग्बन्धः॥ | |

### ध्यानं

सिन्दूरारुण विग्रहां त्रिनयनां माणिक्य मौलिस्फुर
त्तारा नायक शेखरां स्मितमुखीमापीन वक्षोरुहां
पाणिभ्यामलिपूर्ण रत्न चषकं रक्तोत्पलं बिभ्रतीं
सौम्यां रत्न घटस्थ रक्त चरणां ध्यायेत्परामंबिकां ॥

लं-इत्यादि पञ्चपूजा ॥

## ऐं ह्रीं श्रीं श्रीमात्रे नमः

1. श्रीमाता श्रीमहाराज्ञी श्रीमत्सिम्हासनेश्वरी
चिदग्निकुण्डसम्भूता देवकार्यसमुद्यता (1-5)

2. उद्यद्भानुसहस्राभा चतुर्बाहुसमन्विता
रागस्वरूपपाशाढ्या क्रोधाकाराङ्कुशोज्ज्वला (6-9)

3. मनोरूपेक्षुकोदण्डा पञ्चतन्मात्रसायका
निजारुणप्रभापूरमज्जद्ब्रह्माण्ड मण्डला (10-12)

4. चम्पकाशोकपुन्नागसौगन्धिकलसत्कचा
कुरुविन्दमणिश्रेणीकनत्कोटीरमण्डिता (13-14)

5. अष्टमीचन्द्रविभ्राजदलिकस्थलशोभिता
मुखचन्द्रकलङ्काभमृगनाभिविशेषका (15-16)

6. वदनस्मरमाङ्गल्यगृहतोरणचिल्लिका
वक्त्रलक्ष्मीपरीवाहचलन्मीनाभलोचना (17-18)

7. नवचम्पकपुष्पाभनासादण्डविराजिता
ताराकान्तितिरस्कारिनासाभरणभासुरा (19-20)

8. कदम्बमञ्जरीक्लुप्तकर्णपूरमनोहरा
ताटङ्कयुगलीभूततपनोडुपमण्डला (21-22)

9. पद्मरागशिलादर्शपरिभाविकपोलभूः
नवविद्रुमबिम्बश्रीन्यक्कारिरदनच्छदा (23-24)

10. शुद्धविद्याङ्कुराकारद्विजपङ्क्तिद्वयोज्ज्वला
कर्पूरवीटिकामोदसमाकर्षद्दिगन्तरा (25-26)
11. निजसल्लापमाधुर्यविनिर्भर्त्सितकच्छपी
मन्दस्मितप्रभापूरमज्जत्कामेशमानसा (27-28)
12. अनाकलितसादृश्यचिबुकश्रीविराजिता
कामेशबद्धमाङ्गल्यसूत्रशोभितकन्धरा (29-30)
13. कनकाङ्गदकेयूरकमनीयभुजान्विता
रत्नग्रैवेयचिन्ताकलोलमुक्ताफलान्विता (31-32)
14. कामेश्वरप्रेमरत्नमणिप्रतिपणस्तनी
नाभ्यालवालरोमालिलताफलकुचद्वयी (33-34)
15. लक्ष्यरोमलताधारतासमुन्नेयमध्यमा
स्तनभारदलन्मध्यपट्टबन्धवलित्रया (35-36)
16. अरुणारुणकौसुम्भवस्त्रभास्वत्कटीतटी
रत्नकिङ्किणिकारम्यरशनादामभूषिता (37-38)
17. कामेशज्ञातसौभाग्यमार्दवोरुद्वयान्विता
माणिक्यमकुटाकारजानुद्वयविराजिता (39-40)
18. इन्द्रगोपपरिक्षिप्तस्मरतूणाभजंघिका
गूढगुल्फा कूर्मपृष्ठजयिष्णुप्रपदान्विता (41-43)
19. नखदीधितिसञ्छन्ननमज्जनतमोगुणा

पदद्वयप्रभाजालपराकृतसरोरुहा (44-45)

20. शिञ्जानमणिमञ्जीरमण्डितश्रीपदाम्बुजा

मरालीमन्दगमना महालावण्यशेवधिः (46-48)

21. सर्वारुणाऽनवद्याङ्गी सर्वाभरणभूषिता

शिवकामेश्वराङ्कस्था शिवा स्वाधीनवल्लभा (49-54)

22. सुमेरुमध्यशृङ्गस्था श्रीमन्नगरनायिका

चिन्तामणिगृहान्तस्था पञ्चब्रह्मासनस्थिता (55-58)

23. महापद्माटवीसम्स्था कदम्बवनवासिनी

सुधासागरमध्यस्था कामाक्षी कामदायिनी (59-63)

24. देवर्षिगणसंघातस्तूयमानात्मवैभवा

भण्डासुरवधोद्युक्तशक्तिसेनासमन्विता (64-65)

25. सम्पत्करीसमारूढसिन्धुरव्रजसेविता

अश्वारूढाधिष्ठिताश्वकोटिकोटिभिरावृता (66-67)

26. चक्रराजरथारूढसर्वायुधपरिष्कृता

गेयचक्ररथारूढमन्त्रिणीपरिसेविता (68-69)

27. किरिचक्र रथारूढ दण्डनाथा पुरस्कृता

ज्वालामालिनिकाक्षिप्त वह्नि प्राकार मध्यगा (70-71)

28. भण्ड सैन्य वधोद्युक्त शक्ति विक्रम हर्षिता

नित्या पराक्रमाटोप निरीक्षण समुत्सुका (72-73)

29. भण्ड पुत्र वधोद्युक्त बाला विक्रम नन्दिता
मन्त्रिण्यम्बा विरचित विषङ्ग वध तोषिता (74-75)

30. विशुक्र प्राण हरण वाराही वीर्य नन्दिता
कामेश्वर मुखालोक कल्पित श्री गणेश्वरा (76-77)

31. महागणेश निर्भिन्न विघ्नयन्त्र प्रहर्षिता
भण्डासुरेन्द्र निर्मुक्त शस्त्र प्रत्यस्त्र वर्षिणी (78-79)

32. कराङ्गुलि नखोत्पन्न नारायण दशाकृतिः
महा पाशुपतास्त्राग्नि निर्दग्धासुर सैनिका (80-81)

33. कामेश्वरास्त्रनिर्दग्ध सभण्डासुरशून्यका
ब्रह्मोपेन्द्रमहेन्द्रादिदेवसम्स्तुतवैभवा (82-83)

34. हरनेत्राग्निसन्दग्धकामसञ्जीवनौषधिः
श्रीमद्वाग्भवकूटैकस्वरूपमुखपङ्कजा (84-85)

35. कण्ठाथःकटिपर्यन्तमध्यकूटस्वरूपिणी
शक्तिकूटैकतापन्नकट्यधोभागधारिणी (86-87)

36. मूलमन्त्रात्मिका मूलकूटत्रयकळेबरा
कुलामृतैकरसिका कुलसङ्केतपालिनी (88-91)

37. कुलाङ्गना कुलान्तःस्था कौलिनी कुलयोगिनी
अकुला समयान्तःस्था समयाचारतत्परा (92-98)

38. मूलाधारैकनिलया ब्रह्मग्रन्थिविभेदिनी

मणिपूरान्तरुदिता विष्णुग्रन्थिविभेदिनी (99-102)

39. आज्ञाचक्रान्तरालस्था रुद्रग्रन्थिविभेदिनी

सहस्त्राराम्बुजारूढा सुधासाराभिवर्षिणी (103-106)

40. तटिल्लतासमरुचिषड्चक्रोपरिसम्स्थिता

महासक्तिः कुण्डलिनी बिसतन्तुतनीयसी (107-111)

41. भवानी भावनागम्या भवारण्यकुठारिका

भद्रप्रिया भद्रमूर्ति र्भक्तसौभाग्यदायिनी (112-117)

42. भक्तिप्रिया भक्तिगम्या भक्तिवश्या भयापहा

शाम्भवी शारदाराध्या शर्वाणी शर्म दायिनी (118-125)

43. शाङ्करी श्रीकरी साध्वी शरच्चन्द्रनिभानना

शातोदरी शान्तिमती निराधारा निरञ्जना (126-133)

44. निर्लेपा निर्मला नित्या निराकारा निराकुला

निर्गुणा निष्कला शान्ता निष्कामा निरुपप्लवा (134-143)

45. नित्यमुक्ता निर्विकारा निष्प्रपञ्चा निराश्रया

नित्यशुद्धा नित्यबुद्धा निरवद्या निरन्तरा (144-151)

46. निष्कारणा निष्कलङ्का निरुपाधि र्निरीश्वरा

नीरागा रागमथनी निर्मदा मदनाशिनी (152-159)

47. निश्चिन्ता निरहङ्कारा निर्मोहा मोहनाशिनी

निर्ममा ममताहन्त्री निष्पापा पापनाशिनी (160-167)

48. निष्क्रोधा क्रोधशमनी निर्लोभा लोभनाशिनी
निःसम्शया सम्शयघ्नी निर्भवा भवनाशिनी (168-175)
49. निर्विकल्पा निराबाधा निर्भेदा भेदनाशिनी
निर्नाशा मृत्युमथनी निष्क्रिया निष्परिग्रहा (176-183)
50. निस्तुला नीलचिकुरा निरपाया निरत्यया
दुर्लभा दुर्गमा दुर्गा दुःखहन्त्री सुखप्रदा (184-192)
51. दुष्टदूरा दुराचारशमनी दोषवर्जिता
सर्वज्ञा सान्द्रकरुणा समानाधिकवर्जिता (193-198)
52. सर्वशक्तिमयी सर्वमङ्गला सद्गतिप्रदा
सर्वेश्वरी सर्वमयी सर्वमन्त्रस्वरूपिणी (199-204)
53. सर्वयन्त्रात्मिका सर्वतन्त्ररूपा मनोन्मनी
माहेश्वरी महादेवी महालक्ष्मी मृडप्रिया (205-211)
54. महारूपा महापूज्या महापातकनाशिनी
महामाया महासत्त्वा महाशक्ति र्महारतिः (212-218)
55. महाभोगा महैश्वर्या महावीर्या महाबला
महाबुद्धिर्-महासिद्धिर्-महायोगेश्वरेश्वरी (219-225)
56. महातन्त्रा महामन्त्रा महायन्त्रा महासना
महायागक्रमाराध्या महाभैरवपूजिता (226-231)
57. महेश्वरमहाकल्प महाताण्डव साक्षिणी

महाकामेशमहिषी महात्रिपुरसुन्दरी (232-234)

58. चतुःषष्ट्युपचाराढ्या चतुष्षष्टिकलामयी

महाचतुष्षष्टिकोटियोगिनीगणसेविता (235-237)

59. मनुविद्या चन्द्रविद्या चन्द्रमण्डलमध्यगा

चारुरूपा चारुहासा चारुचन्द्रकलाधरा (238-243)

60. चराचरजगन्नाथा चक्रराजनिकेतना

पार्वती पद्मनयना पद्मरागसमप्रभा (244-248)

61. पञ्चप्रेतासनासीना पञ्चब्रह्मस्वरूपिणी

चिन्मयी परमानन्दा विज्ञानघनरूपिणी (249-253)

62. ध्यानध्यातृध्येयरूपा धर्माधर्मविवर्जिता

विश्वरूपा जागरिणी स्वपन्ती तैजसात्मिका (254-259)

63. सुप्ता प्राज्ञात्मिका तुर्या सर्वावस्थाविवर्जिता

सृष्टिकर्त्री ब्रह्मरूपा गोप्त्री गोविन्दरूपिणी (260-267)

64. सम्हारिणी रुद्ररूपा तिरोधानकरीश्वरी

सदाशिवाऽनुग्रहदा पञ्चकृत्यपरायणा (268-274)

65. भानुमण्डलमध्यस्था भैरवी भगमालिनी

पद्मासना भगवती पद्मनाभसहोदरी (275-280)

66. उन्मेषनिमिषोत्पन्नविपन्नभुवनावलिः

सहस्रशीर्षवदना सहस्राक्षी सहस्रपात् (281-284)

67. आब्रह्मकीटजननी वर्णाश्रमविधायिनी
निजाज्ञारूपनिगमा पुण्यापुण्यफलप्रदा (285-288)
68. श्रुतिसीमन्तसिन्दूरीकृतपादाब्जधूलिका
सकलागमसन्दोहशुक्तिसम्पुटमौक्तिका (289-290)
69. पुरुषार्थप्रदा पूर्णा भोगिनी भुवनेश्वरी
अम्बिकाऽनादिनिधना हरिब्रह्मेन्द्रसेविता (291-297)
70. नारायणी नादरूपा नामरूपविवर्जिता
ह्रीङ्कारी ह्रीमती हृद्या हेयोपादेयवर्जिता (298-304)
71. राजराजार्चिता राज्ञी रम्या राजीवलोचना
रञ्जनी रमणी रस्या रणत्किङ्किणिमेखला (305-312)
72. रमा राकेन्दुवदना रतिरूपा रतिप्रिया
रक्षाकरी राक्षसघ्नी रामा रमणलम्पटा (313-320)
73. काम्या कामकलारूपा कदम्बकुसुमप्रिया
कल्याणी जगतीकन्दा करुणारससागरा (321-326)
74. कलावती कलालापा कान्ता कादम्बरीप्रिया
वरदा वामनयना वारुणीमदविह्वला (327-333)
75. विश्वाधिका वेदवेद्या विन्ध्याचलनिवासिनी
विधात्री वेदजननी विष्णुमाया विलासिनी (334-340)
76. क्षेत्रस्वरूपा क्षेत्रेशी क्षेत्रक्षेत्रज्ञपालिनी

क्षयवृद्धिविनिर्मुक्ता क्षेत्रपालसमर्चिता (341-345)

77. विजया विमला वन्द्या वन्दारुजनवत्सला

वाग्वादिनी वामकेशी वह्निमण्डलवासिनी (346-352)

78. भक्तिमत्कल्पलतिका पशुपाशविमोचिनी

सम्हृताशेषपाषण्डा सदाचारप्रवर्तिका (353-356)

79. तापत्रयाग्निसन्तप्तसमाह्लादनचन्द्रिका

तरुणी तापसाराध्या तनुमध्या तमोऽपहा (357-361)

80. चितिस्-तत्पदलक्ष्यार्था चिदेकरसरूपिणी

स्वात्मानन्दलवीभूतब्रह्माद्यानन्दसन्ततिः (362-365)

81. परा प्रत्यक्चितीरूपा पश्यन्ती परदेवता

मध्यमा वैखरीरूपा भक्तमानसहम्सिका (366-372)

82. कामेश्वरप्राणनाडी कृतज्ञा कामपूजिता

श्रृङ्गाररससम्पूर्णा जया जालन्धरस्थिता (373-378)

83. ओड्याणपीठनिलया बिन्दुमण्डलवासिनी

रहोयागक्रमाराध्या रहस्तर्पणतर्पिता (379-382)

84. सद्यःप्रसादिनी विश्वसाक्षिणी साक्षिवर्जिता

षडङ्गदेवतायुक्ता षाड्गुण्यपरिपूरिता (383-387)

85. नित्यक्लिन्ना निरुपमा निर्वाणसुखदायिनी

नित्याषोडशिकारूपा श्रीकंठार्धशरीरिणी (388-392)

86. प्रभावती प्रभारूपा प्रसिद्धा परमेश्वरी
मूलप्रकृति रव्यक्ता व्यक्ताव्यक्तस्वरूपिणी (393-399)

87. व्यापिनी विविधाकारा विद्याऽविद्यास्वरूपिणी
महाकामेशनयनकुमुदाह्लादकौमुदी (400-403)

88. भक्तहार्दतमोभेदभानुमद्भानुसन्ततिः
शिवदूती शिवाराध्या शिवमूर्तिः शिवङ्करी (404-408)

89. शिवप्रिया शिवपरा शिष्टेष्टा शिष्टपूजिता
अप्रमेया स्वप्रकाशा मनोवाचामगोचरा (409-415)

90. चिच्छक्ति श्चेतनारूपा जडशक्ति र्जडात्मिका
गायत्री व्याहृतिः सन्ध्या द्विजबृन्दनिषेविता (416-423)

91. तत्त्वासना तत्त्वमयी पञ्चकोशान्तरस्थिता
निस्सीममहिमा नित्ययौवना मदशालिनी (424-431)

92. मदघूर्णितरक्ताक्षी मदपाटलगण्डभूः
चन्दनद्रवदिग्धाङ्गी चाम्पेयकुसुमप्रिया (432-435)

93. कुशला कोमलाकारा कुरुकुल्ला कुलेश्वरी
कुलकुण्डालया कौलमार्गतत्परसेविता (436-441)

94. कुमारगणनाथाम्बा तुष्टिः पुष्टिर्-मतिर्-धृतिः
शान्तिः स्वस्तिमती कान्तिर्-नन्दिनी विघ्ननाशिनी (442-451)

95. तेजोवती त्रिनयना लोलाक्षीकामरूपिणी

मालिनी हम्सिनी माता मलयाचलवासिनी (452-458)

96. सुमुखी नलिनी सुभ्रूः शोभना सुरनायिका
कालकण्ठी कान्तिमती क्षोभिणी सूक्ष्मरूपिणी (459-467)

97. वज्रेश्वरी वामदेवी वयोऽवस्थाविवर्जिता
सिद्धेश्वरी सिद्धविद्या सिद्धमाता यशस्विनी (468-474)

98. विशुद्धिचक्रनिलयाऽऽरक्तवर्णा त्रिलोचना
खट्वाङ्गादिप्रहरणा वदनैकसमन्विता (475-479)

99. पायसान्नप्रिया त्वक्स्था पशुलोकभयङ्करी
अमृतादिमहाशक्तिसंवृता डाकिनीश्वरी (480-484)

100. अनाहताब्जनिलया श्यामाभा वदनद्वया
दम्ष्ट्रोज्ज्वलाऽक्षमालादिधरा रुधिरसम्स्थिता (485-490)

101. कालरात्र्यादिशक्त्योघवृता स्निग्धौदनप्रिया
महावीरेन्द्रवरदा राकिण्यम्बास्वरूपिणी (491-494)

102. मणिपूराब्जनिलया वदनत्रयसम्युता
वज्रादिकायुधोपेता डामर्यादिभिरावृता (495-498)

103. रक्तवर्णा माम्सनिष्ठा गुडान्नप्रीतमानसा
समस्तभक्तसुखदा लाकिन्यम्बास्वरूपिणी (499-503)

104. स्वाधिष्ठानाम्बुजगता चतुर्वक्त्रमनोहरा
शूलाद्यायुधसम्पन्ना पीतवर्णाऽतिगर्विता (504-508)

105. मेदोनिष्ठा मधुप्रीता बन्दिन्यादिसमन्विता
दध्यन्नासक्तहृदया काकिनीरूपधारिणी (509-513)

106. मूलाधाराम्बुजारूढा पञ्चवक्त्राऽस्थिसंस्थिता
अङ्कुशादिप्रहरणा वरदादिनिषेविता (514-518)

107. मुद्गौदनासक्तचित्ता साकिन्यम्बास्वरूपिणी
आज्ञाचक्राब्जनिलया शुक्लवर्णा षडानना (519-523)

108. मज्जासंस्था हंसवती मुख्यशक्तिसमन्विता
हरिद्रान्नैकरसिका हाकिनीरूपधारिणी (524-527)

109. सहस्रदलपद्मस्था सर्ववर्णोपशोभिता
सर्वायुधधरा शुक्लसंस्थिता सर्वतोमुखी (528-532)

110. सर्वौदनप्रीतचित्ता याकिन्यम्बास्वरूपिणी
स्वाहा स्वधाऽमतिर्-मेधा श्रुतिः स्मृतिरनुत्तमा (533-541)

111. पुण्यकीर्तिः पुण्यलभ्या पुण्यश्रवणकीर्तना
पुलोमजार्चिता बन्धमोचनी बर्बरालका (542-547)

112. विमर्शरूपिणी विद्या वियदादिजगत्प्रसूः
सर्वव्याधिप्रशमनी सर्वमृत्युनिवारिणी (548-552)

113. अग्रगण्याऽचिन्त्यरूपा कलिकल्मषनाशिनी
कात्यायनी कालहन्त्री कमलाक्षनिषेविता (553-558)

114. ताम्बूलपूरितमुखी दाडिमीकुसुमप्रभा

मृगाक्षी मोहिनी मुख्या मृडानीमित्ररूपिणी (559-565)

115. नित्यतृप्ता भक्तनिधि र्नियन्त्री निखिलेश्वरी

मैत्र्यादिवासनालभ्या महाप्रलयसाक्षिणी (566-571)

116. पराशक्तिः परानिष्ठा प्रज्ञानघनरूपिणी

माध्वीपानालसा मत्ता मातृकावर्णरूपिणी (572-577)

117. महाकैलासनिलया मृणालमृदुदोर्लता

महनीया दयामूर्तिर्-महासाम्राज्यशालिनी (578-582)

118. आत्मविद्या महाविद्या श्रीविद्या कामसेविता

श्रीषोडशाक्षरीविद्या त्रिकूटा कामकोटिका (583-589)

119. कटाक्षकिङ्करीभूतकमलाकोटिसेविता

शिरःस्थिता चन्द्रनिभा भालस्थेन्द्रधनुःप्रभा (590-594)

120. हृदयस्था रविप्रख्या त्रिकोणान्तरदीपिका

दाक्षायणी दैत्यहन्त्री दक्षयज्ञविनाशिनी (595-600)

121. दरान्दोलितदीर्घाक्षी दरहासोज्ज्वलन्मुखी

गुरुमूर्तिर्-गुणनिधिर्-गोमाता गुहजन्मभूः (601-606)

122. देवेशी दण्डनीतिस्था दहराकाशरूपिणी

प्रतिपन्मुख्यराकान्ततिथिमण्डलपूजिता (607-610)

123. कलात्मिका कलानाथा काव्यालापविनोदिनी

सचामर रमावाणी सव्य दक्षिण सेविता (611-614)

124. आदिशक्ति रमे यात्मा परमा पावनाकृतिः
अनेक कोटि ब्रह्माण्ड जननी दिव्य विग्रहा (615-621)
125. क्लीङ्कारी केवला गुह्या कैवल्य पददायिनी
त्रिपुरा त्रिजगद्वन्द्या त्रिमूर्ति स्त्रिदशेश्वरी (622-629)
126. त्र्यक्षरी दिव्यगन्धाढ्या सिन्दूरतिलकाञ्चिता
उमा शैलेन्द्रतनया गौरी गन्धर्वसेविता (630-636)
127. विश्वगर्भा स्वर्णग**र्भाऽव**रदा वागधीश्वरी
ध्यानग**म्याऽप**रिच्छेद्या ज्ञानदा ज्ञान विग्रहा (637-644)
128. सर्ववेदान्तसम्वेद्या सत्यानन्दस्वरूपिणी
लोपामुद्रार्चिता लीलाक्लृप्तब्रह्माण्डमण्डला (645-648)
129. अदृश्या दृश्यरहिता विज्ञात्री वेद्यवर्जिता
योगिनी योगदा योग्या योगानन्दा युगन्धरा (649-657)
130. इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिस्वरूपिणी
सर्वाधारा सुप्रतिष्ठा सदसद्रूपधारिणी (658-661)
131. अष्टमूर्ति**र**जाजैत्री लोकयात्राविधायिनी
एकाकिनी भूमरूपा निर्द्वैता द्वैतवर्जिता (662-668)
132. अन्नदा वसुदा वृद्धा ब्रह्मात्मैक्यस्वरूपिणी
बृहती ब्राह्मणी ब्राह्मी ब्रह्मानन्दाबलिप्रिया (669-677)
133. भाषारूपा बृहत्सेना भावाभावविवर्जिता

सुखाराध्या शुभकरी शोभनासुलभागतिः (678-683)

134. राजराजेश्वरी राज्यदायिनी राज्यवल्लभा

राजत्कृपा राजपीठनिवेशितनिजाश्रिताः (684-688)

135. राज्यलक्ष्मीः कोशनाथा चतुरङ्गबलेश्वरी

साम्राज्यदायिनी सत्यसन्धा सागरमेखला (689-694)

136. दीक्षिता दैत्यशमनी सर्वलोकवशङ्करी

सर्वार्थदात्री सावित्री सच्चिदानन्दरूपिणी (695-700)

137. देशकालापरिच्छिन्ना सर्वगा सर्वमोहिनी

सरस्वती शास्त्रमयी गुहाम्बा गुह्यरूपिणी (701-707)

138. सर्वोपाधिविनिर्मुक्ता सदाशिवपतिव्रता

सम्प्रदायेश्वरी साध्वी गुरुमण्डलरूपिणी (708-713)

139. कुलोत्तीर्णा भगाराध्या माया मधुमती मही

गणाम्बा गुह्यकाराध्या कोमलाङ्गी गुरुप्रिया (714-722)

140. स्वतन्त्रा सर्वतन्त्रेशी दक्षिणामूर्तिरूपिणी

सनकादिसमाराध्या शिवज्ञानप्रदायिनी (723-727)

141. चित्कलानन्दकलिका प्रेमरूपा प्रियङ्करी

नामपारायणप्रीता नन्दिविद्या नटेश्वरी (728-734)

142. मिथ्याजगदधिष्ठाना मुक्तिदा मुक्तिरूपिणी

लास्यप्रिया लयकरी लज्जा रम्भादिवन्दिता (735-741)

143. भवदावसुधावृष्टिः पापारण्यदवानला
दौर्भाग्यतूलवातूला जराध्वान्तरविप्रभा (742-745)

144. भाग्याब्धिचन्द्रिका भक्तचित्तकेकिघनाघना
रोगपर्वतदम्भोलिर्मृत्युदारुकुठारिका (746-749)

145. महेश्वरी महाकाली महाग्रासा महाशना
अपर्णा चण्डिका चण्डमुण्डासुरनिषूदिनी (750-756)

146. क्षराक्षरात्मिका सर्वलोकेशी विश्वधारिणी
त्रिवर्गदात्री सुभगा त्र्यम्बका त्रिगुणात्मिका (757-763)

147. स्वर्गापवर्गदा शुद्धा जपापुष्पनिभाकृतिः
ओजोवती द्युतिधरा यज्ञरूपा प्रियव्रता (764-770)

148. दुराराध्या दुराधर्षा पाटलीकुसुमप्रिया
महती मेरुनिलया मन्दारकुसुमप्रिया (771-776)

149. वीराराध्या विराड्रूपा विरजा विश्वतोमुखी
प्रत्यग्रूपा पराकाशा प्राणदा प्राणरूपिणी (777-784)

150. मार्ताण्डभैरवाराध्या मन्त्रिणीन्यस्तराज्यधूः
त्रिपुरेशी जयत्सेना निस्त्रैगुण्या परापरा (785-790)

151. सत्यज्ञानानन्दरूपा सामरस्यपरायणा
कपर्दिनी कलामाला कामधुक्-कामरूपिणी (791-796)

152. कलानिधिः काव्यकला रसज्ञा रसशेवधिः

पुष्टा पुरातना पूज्या पुष्करा पुष्करेक्षणा (797-805)

153. परम्ज्योतिः परन्धाम परमाणुः परात्परा

पाशहस्ता पाशहन्त्री परमन्त्रविभेदिनी (806-812)

154. मूर्ताऽमूर्तानित्यतृप्ता मुनिमानसहम्सिका

सत्यव्रता सत्यरूपा सर्वान्तर्यामिनी सती (813-820)

155. ब्रह्माणी ब्रह्म जननी बहुरूपा बुधार्चिता

प्रसवित्री प्रचण्डाऽज्ञा प्रतिष्ठा प्रकटाकृतिः (821-830)

156. प्राणेश्वरी प्राणदात्री पञ्चाशत्पीठरूपिणी

विशृङ्खला विविक्तस्था वीरमाता वियत्प्रसूः (831-837)

157. मुकुन्दा मुक्तिनिलया मूलविग्रहरूपिणी

भावज्ञा भवरोगघ्नी भवचक्रप्रवर्तिनी (838-843)

158. छन्दस्सारा शास्त्रसारा मन्त्रसारा तलोदरी

उदारकीर्तिरुद्दामवैभवा वर्णरूपिणी (844-850)

159. जन्ममृत्युजरातप्तजनविश्रान्तिदायिनी

सर्वोपनिषदुद्घुष्टा शान्त्यतीतकलात्मिका (851-853)

160. गम्भीरा गगनान्तस्था गर्विता गानलोलुपा

कल्पनारहिता काष्ठाऽकान्ता कान्तार्धविग्रहा (854-861)

161. कार्यकारणनिर्मुक्ता कामकेलि तरङ्गिता

कनत्कनकताटङ्का लीलाविग्रहधारिणी (862-865)

162. अजा क्षयविनिर्मुक्ता मुग्धा क्षिप्रप्रसादिनी
अन्तर्मुखसमाराध्या बहिर्मुखसुदुर्लभा (866-871)

163. त्रयी त्रिवर्गनिलया त्रिस्था त्रिपुरमालिनी
निरामया निरालम्बा स्वात्मारामा सुधासृतिः (872-879)

164. सम्सारपङ्कनिर्मग्नसमुद्धरणपण्डिता
यज्ञप्रिया यज्ञकर्त्री यजमानस्वरूपिणी (880-883)

165. धर्माधारा धनाध्यक्षा धनधान्यविवर्धिनी
विप्रप्रिया विप्ररूपा विश्वभ्रमणकारिणी (884-889)

166. विश्वग्रासा विद्रुमाभा वैष्णवी विष्णुरूपिणी
अयोनिर्-योनिनिलया कूटस्था कुलरूपिणी (890-897)

167. वीरगोष्ठीप्रिया वीरा नैष्कर्म्या नादरूपिणी
विज्ञानकलना कल्या विदग्धा बैन्दवासना (898-905)

168. तत्त्वाधिका तत्त्वमयी तत्त्वमर्थस्वरूपिणी
सामगानप्रिया सौम्या सदाशिवकुटुम्बिनी (906-911)

169. सव्यापसव्यमार्गस्था सर्वापद्विनिवारिणी
स्वस्था स्वभावमधुरा धीरा धीरसमर्चिता (912-917)

170. चैतन्यार्घ्यसमाराध्या चैतन्यकुसुमप्रिया
सदोदिता सदातुष्टा तरुणादित्यपाटला (918-922)

171. दक्षिणादक्षिणाराध्या दरस्मेरमुखाम्बुजा

कौलिनी केवलाऽनर्घ्य कैवल्यपददायिनी (923-926)

172. स्तोत्रप्रिया स्तुतिमती श्रुति सम्स्तुतवैभवा

मनस्विनी मानवती महेशी मङ्गलाकृतिः (927-933)

173. विश्वमाता जगद्धात्री विशालाक्षी विरागिणी

प्रगल्भा परमोदारा परामोदा मनोमयी (934-941)

174. व्योमकेशी विमानस्था वज्रिणी वामकेश्वरी

पञ्चयज्ञप्रिया पञ्चप्रेतमञ्चाधिशायिनी (942-947)

175. पञ्चमी पञ्चभूतेशी पञ्चसङ्ख्योपचारिणी

शाश्वती शाश्वतैश्वर्या शर्मदा शम्भुमोहिनी (948-954)

176. धरा धरसुता धन्या धर्मिणी धर्मवर्धिनी

लोकातीता गुणातीता सर्वातीता शमात्मिका (955-963)

177. बन्धूककुसुमप्रख्या बाला लीलाविनोदिनी

सुमङ्गली सुखकरी सुवेषाढ्या सुवासिनी (964-970)

178. सुवासिन्यर्चनप्रीताऽऽशोभना शुद्धमानसा

बिन्दुतर्पण सन्तुष्टा पूर्वजा त्रिपुराम्बिका (971-976)

179. दशमुद्रासमाराध्या त्रिपुराश्रीवशङ्करी

ज्ञानमुद्रा ज्ञानगम्या ज्ञानज्ञेयस्वरूपिणी (977-981)

180. योनिमुद्रा त्रिखण्डेशी त्रिगुणाऽम्बा त्रिकोणगा

अनघाऽद्भुतचारित्रा वांछितार्थप्रदायिनी (982-989)

181. अभ्यासातिशयज्ञाता षडध्वातीतरूपिणी
अव्याजकरुणामूर्तिरज्ञानध्वान्तदीपिका (990-993)
182. आबालगोपविदिता सर्वानुल्लङ्घ्यशासना
श्रीचक्रराजनिलया श्रीमत्त्रिपुरसुन्दरी (994-997)
183. श्रीशिवा शिवशक्त्यैक्यरूपिणी ललिताम्बिका (998-1000)
एवं श्रीललितादेव्यानाम्नाम्साहस्रकं जगुः

*इति श्रीललितासहस्रनामस्तोत्रं सम्पूर्णम् ॥*

*****

## ॥ श्रीललिता त्रिशती स्तोत्रम् ॥

अस्य श्री ललिता त्रिशती स्तोत्र महामन्त्रस्य। भगवान् हयग्रीव ऋषिः। अनुष्टुप् छन्दः। श्री ललिता परमेश्वरी देवता। कएईलह्रीं बीजं। हसकहलह्रीं शक्तिः। सकलह्रीं कीलकं। श्री ललिता परमेश्वरी प्रसाद सिद्ध्यर्थे जपे विनियोगः॥

| | *करन्यासम्* | *अङ्गन्यासम्* |
|---|---|---|
| क ए ई ल ह्रीं | अङ्गुष्ठाभ्यां नमः | हृदयाय नमः |
| ह स क ह ल ह्रीं | तर्जनीभ्यां नमः | शिरसे स्वाहा नमः |
| स क ल ह्रीं | मध्यमाभ्यां नमः | शिखायै वषट् |
| क ए ई ल ह्रीं | अनामिकाभ्यां नमः | कवचाय हुं |
| ह स क ह ल ह्रीं | कनिष्ठिकाभ्यां नमः | नेत्रत्रयाय वौषट् |
| स क ल ह्रीं | करतलकरपृष्ठाभ्यां नमः | अस्त्राय फट् |
| भूर्भुवस्सुवरोमिति | दिग्बन्धः॥ | |

### ध्यानं

अति मधुर चाप हस्तां अपरिमितामोद बाण सौरभ्यां
अरुणामतिशयकरुणाम् अभिनव कुल सुन्दरीं वन्दे॥

1. ककाररूपा कल्याणी कल्याण गुणशालिनी
कल्याण शैल निलया कमनीया कलावती (1-6)

2. कमलाक्षी कल्मषघ्नी करुणामृत सागरा
कदम्ब कानना वासा कदम्ब कुसुमप्रिया (7-11)

3. कन्दर्पविद्या कन्दर्प जनकापाङ्ग वीक्षणा
कर्पूरवीटी सौरभ्य कल्लोलित ककुप्तटा (12-14)

4. कलिदोषहरा कञ्जलोचना कम्रविग्रहा
कर्मादि साक्षिणी कारयित्री कर्मफलप्रदा (15-20)

5. एकार रूपा चैकाक्षर्-येकानेकाक्षराकृतिः
एतत्तदित्य निर्देश्या चैकानन्द चिदाकृतिः (21-25)

6. एवमित्यागमा बोध्या चैक भक्तिमदर्चिता
एकाग्र चित्त निर्ध्याता चैषणा रहितादृता (26-29)

7. एला सुगन्धि चिकुरा चैनः कूट विनाशिनी
एकभोगा चैकरसा चैकैश्वर्य प्रदायिनी (30-34)

8. एकातपत्र साम्राज्य प्रदा चैकान्त पूजिता
एधमान प्रभा चैज दनेजज्जगदीश्वरी (35-38)

9. एकवीरादि सम्सेव्या चैकप्राभव शालिनी
ईकार रूपिणी शित्री चेप्सितार्थ प्रदायिनी (39-43)

10. ईदृगित्य विनिर्देश्या चेश्वरत्व विधायिनी
ईशानादि ब्रह्ममयी चेशित्वाद्यष्ट सिद्धिदा (44-47)

11. ईक्षि त्रीक्षण सृष्टाण्ड कोटिरीश्वर वल्लभा

ईडिता चेश्वरार्धाङ्ग शरीरेशाधिदेवता (48-53)

12. ईश्वर प्रेरणकरी चेशताण्डव साक्षिणी

ईश्वरोत्सङ्ग निलया चेतिबाधा विनाशिनी (54-57)

13. ईहाविरहिता चेशशक्तिरीषत्स्मितानना

लकाररूपा ललिता लक्ष्मी वाणी निषेविता (58-63)

14. लाकिनी ललनारूपा लसद्दाडिम पाटला

ललन्तिकालसत्फाला ललाट नयनार्चिता (64-68)

15. लक्षणोज्ज्वल दिव्याङ्गी लक्षकोट्यण्ड नायिका

लक्ष्यार्था लक्षणागम्या लब्धकामा लतातनुः (69-74)

16. ललामराजदळिका लम्बिमुक्ता लताञ्चिता

लम्बोदर प्रसू र्लभ्या लज्जाढ्या लयवर्जिता (75-80)

17. ह्रीङ्काररूपा ह्रीङ्कारनिलया ह्रीम्पदप्रिया

ह्रीङ्कारबीजा ह्रीङ्कारमन्त्रा ह्रीङ्कारलक्षणा (81-86)

18. ह्रीङ्कारजपसुप्रीता ह्रींमतिः ह्रींविभूषणा

ह्रींशीला ह्रींपदाराध्या ह्रींगर्भा ह्रींपदाभिधा (87-93)

19. ह्रीङ्कारवाच्या ह्रीङ्कारपूज्या ह्रीङ्कारपीठिका

ह्रीङ्कारवेद्या ह्रीङ्कारचिन्त्या ह्रीं ह्रींशरीरिणी (94-100)

20. हकाररूपा हलधृत्पूजिता हरिणेक्षणा

हरप्रिया हराराध्या हरिब्रह्मेन्द्र सेविता (101-106)

21. हयारूढा सेविताङ्घ्रिर्-हयमेध समर्चिता
हर्यक्षवाहना हम्सवाहना हतदानवा (107-111)
22. हत्यादि पापशमनी हरिदश्वादि सेविता
हस्तिकुम्भोत्तुङ्ग कुचा हस्तिकृत्ति प्रियाङ्गना (112-115)
23. हरिद्राकुङ्कुमा दिग्धा हर्यश्वाद्यमरार्चिता
हरिकेशसखी हादिविद्या हालामदालसा (116-119)
24. सकाररूपा सर्वज्ञा सर्वेशी सर्वमङ्गला
सर्वकर्त्री सर्वधात्री सर्वहन्त्री सनातनी (120-128)
25. सर्वानवद्या सर्वाङ्ग सुन्दरी सर्वसाक्षिणी
सर्वात्मिका सर्वसौख्य दात्री सर्वविमोहिनी (129-134)
26. सर्वाधारा सर्वगता सर्वावगुण वर्जिता
सर्वारुणा सर्वमाता सर्वा भरण भूषिता (135-140)
27. ककारार्था कालहन्त्री कामेशी कामितार्थदा
कामसञ्जीविनी कल्या कठिनस्तन मण्डला (141-147)
28. करभोरूः कलानाथ मुखी कचजिताम्बुदा
कटाक्षस्यन्दि करुणा कपालि प्राण नायिका (148-152)
29. कारुण्य विग्रहा कान्ता कान्तिधूत जपावळिः
कलालापा कम्बुकण्ठी करनिर्जित पल्लवा (153-158)
30. कल्पवल्ली समभुजा कस्तूरी तिलकोज्ज्वला

हकारार्था हम्सगतिर्-हाटकाभरणोज्ज्वला (159-163)

31. हारहारिकुचाभोगा हाकिनी हल्यवर्जिता
हरित्पतिसमाराध्या हठात्कार हतासुरा (164-168)

32. हर्षप्रदा हविर्भोक्त्री हार्द सन्तमसापहा
हल्लीसालास्य सन्तुष्टा हम्स मन्त्रार्थ रूपिणी (169-173)

33. हानोपादान निर्मुक्ता हर्षिणी हरि सोदरी
हाहाहूहू मुख स्तुत्या हानि वृद्धि विवर्जिता (174-178)

34. हय्यङ्गवीन हृदया हरि कोपारुणाम्शुका
लकाराख्या लतापूज्या लयस्थित्युद्भवेश्वरी (179-183)

35. लास्य दर्शन सन्तुष्टा लाभालाभ विवर्जिता
लङ्घेतराज्ञा लावण्य शालिनी लघु सिद्धिदा (184-188)

36. लाक्षारस सवर्णाभा लक्ष्मणाग्रज पूजिता
लभ्येतरा लब्धभक्ति सुलभा लाङ्गलायुधा (189-193)

37. लग्नचामर हस्त श्रीशारदा परिवीजिता
लज्जापद समाराध्या लम्पटा लकुलेश्वरी (194-197)

38. लब्धमाना लब्धरसा लब्ध सम्पत्समुन्नतिः
ह्रीङ्कारिणी ह्रीङ्कारादि ह्रींमध्या ह्रींशिखामणिः (198-204)

39. ह्रीङ्कारकुण्डाग्नि शिखा ह्रीङ्कार शशिचन्द्रिका
ह्रीङ्कार भास्कररुचिर् ह्रीङ्काराम्भोद चञ्चला (205-208)

40. ह्रीङ्कार कन्दाङ्कुरिका ह्रीङ्कारैक परायणा
ह्रीङ्कार दीर्घिकाहम्सी ह्रीङ्कारोद्यान केकिनी (209-212)
41. ह्रीङ्कारारण्य हरिणी ह्रीङ्कारावाल वल्लरी
ह्रीङ्कार पञ्जरशुकी ह्रीङ्काराङ्गण दीपिका (213-216)
42. ह्रीङ्कार कन्दरा सिम्ही ह्रीङ्कारम्भोज भृङ्गिका
ह्रीङ्कार सुमनो माध्वी ह्रीङ्कार तरुमञ्जरी (217-220)
43. सकाराख्या समरसा सकलागम सम्-स्तुता
सर्ववेदान्त तात्पर्यभूमिस्-सदसदाश्रया (221-225)
44. सकला सच्चिदानन्दा साध्वी सद्गतिदायिनी
सनकादिमुनिध्येया सदाशिव कुटुम्बिनी (226-231)
45. सकालाधिष्ठानरूपा सत्व रूपा समाकृतिः
सर्वप्रपञ्च निर्मात्री समानाधिक वर्जिता (232-236)
46. सर्वोत्तुङ्गा सङ्गहीना सद्गुणा सकलेष्टदा
ककारिणी काव्यलोला कामेश्वर मनोहरा (237-243)
47. कामेश्वर प्राणनाडी कामेशोत्सङ्ग वासिनी
कामेश्वरालिङ्गिताङ्गी कामेश्वर सुखप्रदा (244-247)
48. कामेश्वर प्रणयिनी कामेश्वर विलासिनी
कामेश्वर तपः सिद्धिः कामेश्वर मनः प्रिया (248-251)
49. कामेश्वर प्राणनाथा कामेश्वर विमोहिनी

कामेश्वर ब्रह्मविद्या कामेश्वर गृहेश्वरी (252-255)

50. कामेश्वराह्लादकरी कामेश्वर महेश्वरी

कामेश्वरी कामकोटि निलया काङ्क्षितार्थदा (256-260)

51. लकारिणी लब्धरूपा लब्धधीर्लब्ध वाञ्छिता

लब्धपाप मनोदूरा लब्धाहङ्कार दुर्गमा (261-266)

52. लब्धशक्ति र्लब्ध देहा लब्धैश्वर्य समुन्नतिः

लब्ध बुद्धिर्लब्ध लीला लब्धयौवन शालिनी (267-272)

53. लब्धातिशय सर्वाङ्ग सौन्दर्या लब्ध विभ्रमा

लब्धरागा लब्धगतिर्लब्धानङ्गागमस्थितिः (273-277)

54. लब्ध भोगा लब्ध सुखा लब्ध हर्षाभि पूजिता

ह्रीङ्कार मूर्तिर् ह्रीङ्कार सौधशृङ्ग कपोतिका (278-282)

55. ह्रीङ्कार दुग्धाब्धि सुधा ह्रीङ्कार कमलेन्दिरा

ह्रीङ्कारमणि दीपार्चिर् ह्रीङ्कार तरुशारिका (283-286)

56. ह्रीङ्कार पेटक मणिर् ह्रीङ्कारदर्श बिम्बिका

ह्रीङ्कार कोशासिलता ह्रीङ्कारास्थान नर्तकी (287-290)

57. ह्रीङ्कार शुक्तिका मुक्ता मणिर् ह्रीङ्कार बोधिता

ह्रीङ्कारमय सौवर्ण स्तम्भ विद्रुम पुत्रिका (291-293)

58. ह्रीङ्कार वेदोपनिषद् ह्रीङ्काराध्वर दक्षिणा

ह्रीङ्कार नन्दनाराम नवकल्पक वल्लरी (294-296)

59. ह्रीङ्कार हिमवद्गङ्गा ह्रीङ्कारार्णव कौस्तुभा
ह्रीङ्कार मन्त्र सर्वस्वा ह्रीङ्कारपर सौख्यदा (297-300)

अति मधुर चाप हस्तां अपरिमितामोद बाण सौरभ्यां
अरुणामतिशयकरुणाम् अभिनव कुल सुन्दरीं वन्दे ॥

*इति श्री ब्रह्माण्डपुराणे उत्तराश्री हयग्रीवागस्त्य संवादे*
*श्रीललितात्रिशती स्तोत्र कथनं सम्पूर्णम् ॥*

*****

# ॥देवी स्तुतिः॥

1. गणेश ग्रह नक्षत्र योगिनी राशि रूपिणीम् ।
देवीं मन्त्र मयीं नौमि मातृकाम् पीठरूपिणीम् ॥
2. प्रणमामि महा देवीं मातृकाम् परमेश्वरीम् ।
कालहल्लो हलोल्लोल कलनाश मकारिणीम् ॥
3. यदक्षरैक मात्रेऽपि सम्सिद्धे स्पर्धते नरः ।
रक्षिताक्ष्यैन्दु कन्दर्प शङ्करानल विष्णुभिः ॥
4. यदक्षर शशिज्योत्स्ना मण्डितं भुवनत्रयम् ।
वन्दे सर्वेश्वरीम् देवीं महाश्री सिद्धिमातृकाम् ॥
5. यदक्षर महासूत्र प्रोतमेतज्जगत्रयम् ।
ब्रह्माण्डादि कटाहान्तं तां वन्दे सिद्धमातृकाम् ॥
6. यदेका दशमाधारां बीजं कोणत्रयोद्भवम् ।
ब्रह्माण्डादि कटाहान्तं जगदध्यापि दृश्यते ॥
7. अकचादितटोन्नद्ध पयशाक्षरवर्गिणीम् ।
ज्येष्ठाङ्ग बाहुपादाग्र मध्यस्वान्त निवासिणीम् ॥
8. तामीकराक्षरोद्धारां सारात् सारां पराम्पराम् ।
प्रणमामि महादेवीं परमानन्दरूपिणीम् ॥
9. अध्यापि यस्या जानन्ति न मनागपिदेवताः ।

केयं कस्माद् क्व केनेति स्वरूपारूप भावनाम् ॥

10. वन्देतामहमक्षय्यां क्षकाराक्षर स्वरूपिणीम् ।
देवीं कुलकलोल्लास प्रोल्लसन्तीं परां शिवाम् ॥

11. वर्गानुक्रमयोगेण यस्यां मात्रष्टकं स्थितम् ।
वन्दे तामष्टवर्गोत्थ महासिद्धकेश्वरीम् ॥

12. कामपूर्ण जकाराख्य श्रीपीठान्तर्निवासिणीम् ।
चतुराज्ञ कोशभूतां नौमि श्रीत्रिपुरामहम् ॥

13. इति द्वादशभिः श्लोकैः स्तवनं सर्व सिद्धिकृत् ।
देव्या स्त्वखन्डरूपायाः स्तवनं तव तध्यतः ॥

14. भूमौ स्खलित पादानां भूमिरेवावलम्बनम् ।
त्वयि जातापराधानां त्वमेव शरणं शिवे ॥

*****